# અધ્યાત્મરામાયણે કિષ્કિન્ધાકાણ્ડમ્

adhyAtmarAmAyaNe kiShkindhAkANDam

sanskritdocuments.org

September 29, 2018

# adhyAtmarAmAyaNe kiShkindhAkANDam

# અધ્યાત્મરામાયણે કિષ્કિન્ધાકાણ્ડમ્

## Sanskrit Document Information

Text title : adhyAtma rAmAyaNa kiShkindhA kANDa

File name : adhyaatmaRamkiShkindhA.itx

Category : adhyAtmarAmAyaNa, raama, vyAsa

Location : doc_raama

Author : Shri Veda Vyas

Transliterated by : Vishwas Bhide vishwas underscore bhide at yahoo.com

Proofread by : Vishwas Bhide , PSA Easwaran, ahimsasoldier

Latest update : July 22, 2006, April 4, 2015

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

September 29, 2018

*sanskritdocuments.org*

# અધ્યાત્મરામાયણે કિષ્કિન્ધાકાણ્ડમ્

## ॥ પ્રથમઃ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
તતઃ સલક્ષ્મણો રામઃ શનૈઃ પમ્પાસરસ્તટમ્ ।
આગત્ય સરસાં શ્રેષ્ઠાં દૃષ્ટ્વા વિસ્મયમાયયૌ ॥ ૧॥

ક્રોશમાત્રં સુવિસ્તીર્ણમગાધામલશમ્બરમ્ ।
ઉત્ફુલ્લામ્બુજકલ્હારકુમુદોત્પલમણ્ડિતમ્ ॥ ૨॥

હંસકારણ્ડવાકીર્ણં ચક્રવાકાદિશોભિતમ્ ।
જલકુક્કુટકોયષ્ટિક્રૌઞ્ચનાદોપનાદિતમ્ ॥ ૩॥

નાનાપુષ્પલતાકીર્ણં નાનાફલસમાવૃતમ્ ।
સતાં મનઃસ્વચ્છજલં પદ્મકિઞ્જલ્કવાસિતમ્ ॥ ૪॥

તત્રોપસ્પૃશ્ય સલિલં પીત્વા શ્રમહરં વિભુઃ ।
સાનુજઃ સરસસ્તીરે શીતલેન પથા યયૌ ॥ ૫॥

ઋષ્યમૂકગિરેઃ પાર્શ્વે ગચ્છન્તૌ રામલક્ષ્મણૌ ।
ધનુર્બાણકરૌ દાન્તૌ જટાવલ્કલમણ્ડિતૌ ।
પશ્યન્તૌ વિવિધાન્ વૃક્ષાન્ ગિરેઃ શોભાં સુવિક્રમૌ ॥ ૬॥

સુગ્રીવસ્તુ ગિરેર્મૂર્ધ્નિ ચતુર્ભિઃ સહ વાનરૈઃ ।
સ્થિત્વા દદર્શ તૌ યાન્તાવારુરોહ ગિરેઃ શિરઃ ॥ ૭॥

ભયાદાહ હનૂમન્તં કૌ તૌ વીરવરૌ સખે ।
ગચ્છ જાનીહિ ભદ્રં તે વટુર્ભૂત્વા દ્વિજાકૃતિઃ ॥ ૮॥

વાલિના પ્રેષિતૌ કિંવા માં હન્તું સમુપાગતૌ ।
તાભ્યાં સમ્ભાષણં કૃત્વા જાનીહિ હૃદયં તયોઃ ॥ ૯॥

યદિ તૌ દુષ્ટહૃદયૌ સંજ્ઞાં કુરુ કરાગ્રતઃ ।

વિનયાવનતો ભૂત્વા એવં જાનીહિ નિશ્ચયમ્ ॥ ૧૦॥

તથેતિ વટુરૂપેણ હનુમાન્ સમુપાગતઃ ।
વિનયાવનતો ભૂત્વા રામં નત્વેદમબ્રવીત્ ॥ ૧૧॥

કૌ યુવાં પુરુષવ્યાઘ્રૌ યુવાનૌ વીરસમ્મતૌ ।
દ્યોતયન્તૌ દિશઃ સર્વાઃ પ્રભયા ભાસ્કરાવિવ ॥ ૧૨॥

યુવાં ત્રૈલોક્યકર્તારાવિતિ ભાતિ મનો મમ ।
યુવાં પ્રધાનપુરુષૌ જગદ્ધેતૂ જગન્મયૌ ॥ ૧૩॥

માયયા માનુષાકારૌ ચરન્તાવિવ લીલયા ।
ભૂભારહરણાર્થાય ભક્તાનાં પાલનાય ચ ॥ ૧૪॥

અવતીર્ણાવિહ પરૌ ચરન્તૌ ક્ષત્રિયાકૃતી ।
જગત્સ્થિતિલયૌ સર્ગં લીલયા કર્તુમુદ્યતૌ ॥ ૧૫॥

સ્વતન્ત્રૌ પ્રેરકૌ સર્વહૃદયસ્થાવિહેશ્વરૌ ।
નરનારાયણૌ લોકે ચરન્તાવિતિ મે મતિઃ ॥ ૧૬॥

શ્રીરામો લક્ષ્મણં પ્રાહ પશ્યૈનં વટુરૂપિણમ્ ।
શબ્દશાસ્ત્રમશેષેણ શ્રુતં નૂનમનેકધા ॥ ૧૭॥

અનેન ભાષિતં કૃત્સ્નં ન કિઞ્ચિદપશબ્દિતમ્ ।
તતઃ પ્રાહ હનૂમન્તં રાઘવો જ્ઞાનવિગ્રહઃ ॥ ૧૮॥

અહં દાશરથી રામસ્ત્વયં મે લક્ષ્મણોઽનુજઃ ।
સીતયા ભાર્યયા સાર્ધં પિતુર્વચનગૌરવાત્ ॥ ૧૯॥

આગતસ્તત્ર વિપિને સ્થિતોઽહં દણ્ડકે દ્વિજ ।
તત્ર ભાર્યા હૃતા સીતા રક્ષસા કેનચિન્મમ ।
તામન્વેષ્ટુમિહાયાતૌ ત્વં કો વા કસ્ય વા વદ ॥ ૨૦॥

વટુરુવાચ ।
સુગ્રીવો નામ રાજા યો વાનરાણાં મહામતિઃ ।
ચતુર્ભિર્મન્ત્રિભિઃ સાર્ધં ગિરિમૂર્ધનિ તિષ્ઠતિ ॥ ૨૧॥

ભ્રાતા કનિયાન્ સુગ્રીવો વાલિનઃ પાપચેતસઃ ।
તેન નિષ્કાસિતો ભાર્યા હૃતા તસ્યેહ વાલિના ॥ ૨૨॥

તદ્ભયાદૃષ્યમૂકાખ્યં ગિરિમાશ્રિત્ય સંસ્થિતઃ ।

અહં સુગ્રીવસચિવો વાયુપુત્રો મહામતે ॥ ૨૩॥

હનુમાન્નામ વિખ્યાતો હ્યઞ્જનીગર્ભસમ્ભવઃ ।
તેન સખ્યં ત્વયા યુક્તં સુગ્રીવેણ રઘૂત્તમ ॥ ૨૪॥

ભાર્યાપહારિણં હન્તું સહાયસ્તે ભવિષ્યતિ ।
ઇદાનીમેવ ગચ્છામ આગચ્છ યદિ રોચતે ॥ ૨૫॥

શ્રીરામ ઉવાચ ।
અહમપ્યાગતસ્તેન સખ્યં કર્તું કપીશ્વર ।
સખ્યુસ્તસ્યાપિ યત્કાર્યં તત્કરિષ્યામ્યસંશયમ્ ॥ ૨૬॥

હનુમાન્ સ્વસ્વરૂપેણ સ્થિતો રામમથાબ્રવીત્ ।
આરોહતાં મમ સ્કન્ધૌ ગચ્છામઃ પર્વતોપરિ ॥ ૨૭॥

યત્ર તિષ્ઠતિ સુગ્રીવો મન્ત્રિભિર્વાલિનો ભયાત્ ।
તથેતિ તસ્યારુરોહ સ્કન્ધં રામોઽથ લક્ષ્મણઃ ॥ ૨૮॥

ઉત્પપાત ગિરેર્મૂર્ધ્નિ ક્ષણાદેવ મહાકપિઃ ।
વૃક્ષચ્છાયાં સમાશ્રિત્ય સ્થિતૌ તૌ રામલક્ષ્મણૌ ॥ ૨૯॥

હનુમાનપિ સુગ્રીવમુપગમ્ય કૃતાઞ્જલિઃ ।
વ્યેતુ તે ભયમાયાતૌ રાજન્ શ્રીરામલક્ષ્મણૌ ॥ ૩૦॥

શીઘ્રમુત્તિષ્ઠ રામેણ સખ્યં તે યોજિતં મયા ।
અગ્નિં સાક્ષિણમારોપ્ય તેન સખ્યં દ્રુતં કુરુ ॥ ૩૧॥

તતોઽતિહર્ષાત્સુગ્રીવઃ સમાગમ્ય રઘૂત્તમમ્ ।
વૃક્ષશાખાં સ્વયં છિત્વા વિષ્ટરાય દદૌ મુદા ॥ ૩૨॥

હનૂમાન્લ્લક્ષ્મણાયાદાત્સુગ્રીવાય ચ લક્ષ્મણઃ ।
હર્ષેણ મહતાવિષ્ટાઃ સર્વ એવાવતસ્થિરે ॥ ૩૩॥

લક્ષ્મણસ્ત્વબ્રવીત્સર્વં રામવૃત્તાન્તમાદિતઃ ।
વનવાસાભિગમનં સીતાહરણમેવ ચ ॥ ૩૪॥

લક્ષ્મણોક્તં વચઃ શ્રુત્વા સુગ્રીવો રામમબ્રવીત્ ।
અહં કરિષ્યે રાજેન્દ્ર સીતાયાઃ પરિમાર્ગણમ્ ॥ ૩૫॥

સાહાય્યમપિ તે રામ કરિષ્યે શત્રુઘાતિનઃ ।
શૃણુ રામ મયા દૃષ્ટં કિઞ્ચિત્તે કથયામ્યહમ્ ॥ ૩૬॥

એકદા મન્ત્રિભિઃ સાર્ધં સ્થિતોઽહં ગિરિમૂર્ધનિ ।
વિહાયસા નીયમાનાં કેનચિત્પ્રમદોત્તમામ્ ॥ ૩૭॥

ક્રોશન્તીં રામરામેતિ દૃષ્ટ્વાસ્માન્ પર્વતોપરિ ।
આમુચ્યાભરણાન્યાશુ સ્વોત્તરીયેણ ભામિની ॥ ૩૮॥

નિરીક્ષ્યાધઃ પરિત્યજ્ય ક્રોશન્તી તેન રક્ષસા ।
નીતાહં ભૂષણાન્યાશુ ગુહાયામક્ષિપં પ્રભો ॥ ૩૯॥

ઇદાનીમપિ પશ્ય ત્વં જાનીહિ તવ વા ન વા ।
ઇત્યુક્ત્વાનીય રામાય દર્શયામાસ વાનરઃ ॥ ૪૦॥

વિમુચ્ય રામસ્તદૃષ્ટ્વા હા સીતેતિ મુહુર્મુહુઃ ।
હૃદિ નિક્ષિપ્ય તત્સર્વં રુરોદ પ્રાકૃતો યથા ॥ ૪૧॥

આશ્વાસ્ય રાઘવં ભ્રાતા લક્ષ્મણો વાક્યમબ્રવીત્ ।
અચિરેણૈવ તે રામ પ્રાપ્યતે જાનકી શુભા ।
વાનરેન્દ્રસહાયેન હત્વા રાવણમાહવે ॥ ૪૨॥

સુગ્રીવોઽપ્યાહ હે રામ પ્રતિજ્ઞાં કરવાણિ તે ।
સમરે રાવણં હત્વા તવ દાસ્યામિ જાનકીમ્ ॥ ૪૩॥

તતો હનૂમાન્ પ્રજ્વાલ્ય તયોરગ્નિં સમીપતઃ ।
તાવુભૌ રામસુગ્રીવાવગ્નૌ સાક્ષિણિ તિષ્ઠતિ ॥ ૪૪॥

બાહૂ પ્રસાર્ય ચાલિઙ્ગ્ય પરસ્પરમકલ્મષૌ ।
સમીપે રઘુનાથસ્ય સુગ્રીવઃ સમુપાવિશત્ ॥ ૪૫॥

સ્વોદન્તં કથયામાસ પ્રણયાદ્રઘુનાયકે ।
સખે શૃણુ મમોદન્તં વાલિના યત્કૃતં પુરા ॥ ૪૬॥

મયપુત્રોઽથ માયાવી નામ્ના પરમદુર્મદઃ ।
કિષ્કિન્ધાં સમુપાગત્ય વાલિનં સમુપાહ્વયત્ ॥ ૪૭॥

સિંહનાદેન મહતા વાલી તુ તદમર્ષણઃ ।
નિર્યયૌ ક્રોધતામ્રાક્ષો જઘાન દૃઢમુષ્ટિના ॥ ૪૮॥

દુદ્રાવ તેન સંવિગ્નો જગામ સ્વગુહાં પ્રતિ ।
અનુદુદ્રાવ તં વાલી માયાવિનમહં તથા ॥ ૪૯॥

તતઃ પ્રવિષ્ટમાલોક્ય ગુહાં માયાવિનં રુષા ।
વાલી મામાહ તિષ્ઠ ત્વં બહિર્ગચ્છામ્યહં ગુહામ્ ।
ઇત્યુક્ત્વાવિશ્ય સ ગુહાં માસમેકં ન નિર્યયૌ ॥ ૫૦॥

માસાદૂર્ધ્વં ગુહાદ્વારાન્નિર્ગતં રુધિરં બહુ ।
તદ્દૃષ્ટ્વા પરિતપ્તાઙ્ગો મૃતો વાલીતિ દુઃખિતઃ ॥ ૫૧॥

ગુહાદ્વારિ શિલામેકાં નિધાય ગૃહમાગતઃ ।
તતોઽબ્રવં મૃતો વાલી ગુહાયાં રક્ષસા હતઃ ॥ ૫૨॥

તચ્છ્રુત્વા દુઃખિતાઃ સર્વે મામનિચ્છન્તમપ્યુત ।
રાજ્યેઽભિષેચનં ચક્રુઃ સર્વે વાનરમન્ત્રિણઃ ॥ ૫૩॥

શિષ્ટં તદા મયા રાજ્યં કિઞ્ચિત્કાલમરિન્દમ ।
તતઃ સમાગતો વાલી મામાહ પરુષં રુષા ॥ ૫૪॥

બહુધા ભર્ત્સયિત્વા માં નિજઘાન ચ મુષ્ટિભિઃ ।
તતો નિર્ગત્ય નગરાદધાવં પરયા ભિયા ॥ ૫૫॥

લોકાન્ સર્વાન્ પરિક્રમ્ય ઋષ્યમૂકં સમાશ્રિતઃ ।
ઋષેઃ શાપભયાત્સોઽપિ નાયાતીમં ગિરિં પ્રભો ॥ ૫૬॥

તદાદિ મમ ભાર્યાં સ સ્વયં ભુઙ્ક્તે વિમૂઢધીઃ ।
અતો દુઃખેન સન્તપ્તો હૃતદારો હૃતાશ્રયઃ ॥ ૫૭॥

વસામ્યદ્ય ભવત્પાદસંસ્પર્શાત્સુખિતોઽસ્મ્યહમ્ ।
મિત્રદુઃખેન સન્તપ્તો રામો રાજીવલોચનઃ ॥ ૫૮॥

હનિષ્યામિ તવ દ્વેષ્યં શીઘ્રં ભાર્યાપહારિણમ્ ।
ઇતિ પ્રતિજ્ઞામકરોત્સુગ્રીવસ્ય પુરસ્તદા ॥ ૫૯॥

સુગ્રીવોઽપ્યાહ રાજેન્દ્ર વાલી બલવતાં બલી ।
કથં હનિષ્યતિ ભવાન્ દેવૈરપિ દુરાસદમ્ ॥ ૬૦॥

શૃણુ તે કથયિષ્યામિ તદ્બલં બલિનાં વર ।
કદાચિદ્દુન્દુભિર્નામ મહાકાયો મહાબલઃ ॥ ૬૧॥

કિષ્કિન્ધામગમદ્રાત્રૌ મહામહિષરૂપધૃક્ ।
યુદ્ધાય વાલિનં રાત્રૌ સમાહ્વયત ભીષણઃ ॥ ૬૨॥

તચ્છ્રુત્વાઽસહમાનોઽસૌ વાલી પરમકોપનઃ ।

મહિષં શૃઙ્ગયોર્ધૃત્વા પાતયામાસ ભૂતલે ॥ ૬૩॥

પાદેનૈકેન તત્કાયમાક્રમ્યાસ્ય શિરો મહત્ ।
હસ્તાભ્યાં ભ્રામયંશ્છિત્ત્વા તોલયિત્વાક્ષિપદ્ભુવિ ॥ ૬૪॥

પપાત તચ્છિરો રામ માતઙ્ગાશ્રમસન્નિધૌ ।
યોજનાત્પતિતં તસ્માન્મુનેરાશ્રમમણ્ડલે ॥ ૬૫॥

રક્તવૃષ્ટિઃ પપાતોચ્ચૈર્દૃષ્ટ્વા તાં ક્રોધમૂર્ચ્છિતઃ ।
માતઙ્ગો વાલિનં પ્રાહ યદ્યાગન્તાસિ મે ગિરિમ્ ॥ ૬૬॥

ઇતઃ પરં ભગ્નશિરા મરિષ્યસિ ન સંશયઃ ।
એવં શપ્તસ્તદારભ્ય ઋષ્યમૂકં ન યાત્યસૌ ॥ ૬૭॥

એતજ્જ્ઞાત્વાહમપ્યત્ર વસામિ ભયવર્જિતઃ ।
રામ પશ્ય શિરસ્તસ્ય દુન્દુભેઃ પર્વતોપમમ્ ॥ ૬૮॥

તત્ક્ષેપણે યદા શક્તઃ શક્તસ્ત્વં વાલિનો વધે ।
ઇત્યુક્ત્વા દર્શયામાસ શિરસ્તદ્ગિરિસન્નિભમ્ ॥ ૬૯॥

દૃષ્ટ્વા રામઃ સ્મિતં કૃત્વા પાદાઙ્ગુષ્ઠેન ચાક્ષિપત્ ।
દશયોજનપર્યન્તં તદદ્ભુતમિવાભવત્ ॥ ૭૦॥

સાધુ સાધ્વિતિ સમ્પ્રાહ સુગ્રીવો મન્ત્રિભિઃ સહ ।
પુનરપ્યાહ સુગ્રીવો રામં ભક્તપરાયણમ્ ॥ ૭૧॥

એતે તાલા મહાસારાઃ સપ્ત પશ્ય રઘૂત્તમ ।
એકૈકં ચાલયિત્વાસૌ નિષ્પત્રાન્ કુરુતેઽઞ્જસા ॥ ૭૨॥

યદિ ત્વમેકબાણેન વિદ્ધ્વા છિદ્રં કરોષિ ચેત્ ।
હતસ્ત્વયા તદા વાલી વિશ્વાસો મે પ્રજાયતે ।
તથેતિ ધનુરાદાય સાયકં તત્ર સન્દધે ॥ ૭૩॥

બિભેદ ચ તદા રામઃ સપ્ત તાલાન્ મહાબલઃ ।
તાલાન્ સપ્ત વિનિર્ભિદ્ય ગિરિં ભૂમિં ચ સાયકઃ ॥ ૭૪॥

પુનરાગત્ય રામસ્ય તૂણીરે પૂર્વવત્સ્થિતઃ ।
તતોઽતિહર્ષાત્સુગ્રીવો રામમાહાતિવિસ્મિતઃ ॥ ૭૫॥

દેવ ત્વં જગતાં નાથઃ પરમાત્મા ન સંશયઃ ।
મત્પૂર્વકૃતપુણ્યૌઘૈઃ સઙ્ગતોઽદ્ય મયા સહ ॥ ૭૬॥

ત્વાં ભજન્તિ મહાત્માનઃ સંસારવિનિવૃત્તયે ।
ત્વાં પ્રાપ્ય મોક્ષસચિવં પ્રાર્થયેઽહં કથં ભવમ્ ॥ ૭૭॥

દારાઃ પુત્રા ધનં રાજ્યં સર્વં ત્વન્માયયા કૃતમ્ ।
અતોઽહં દેવદેવેશ નાકાઙ્ક્ષેઽન્યત્પ્રસીદ મે ॥ ૭૮॥

આનન્દાનુભવં ત્વાદ્ય પ્રાપ્તોઽહં ભાગ્યગૌરવાત્ ।
મૃદર્થં યતમાનેન નિધાનમિવ સત્પતે ॥ ૭૯॥

અનાદ્યવિદ્યાસંસિદ્ધં બન્ધનં છિન્નમદ્ય નઃ ।
યજ્ઞદાનતપઃકર્મપૂર્તેષ્ટાદિભિરપ્યસૌ ॥ ૮૦॥

ન જીર્યતે પુનર્દાર્ઢ્યં ભજતે સંસૃતિઃ પ્રભો ।
ત્વત્પાદદર્શનાત્સદ્યો નાશમેતિ ન સંશયઃ ॥ ૮૧॥

ક્ષણાર્ધમપિ યચ્ચિત્તં ત્વયિ તિષ્ઠત્યચઞ્ચલમ્ ।
તસ્યાજ્ઞાનમનર્થાનાં મૂલં નશ્યતિ તત્ક્ષણાત્ ॥ ૮૨॥

તત્તિષ્ઠતુ મનો રામ ત્વયિ નાન્યત્ર મે સદા ॥ ૮૩॥

રામરામેતિ યદ્વાણી મધુરં ગાયતિ ક્ષણમ્ ।
સ બ્રહ્મહા સુરાપો વા મુચ્યતે સર્વપાતકૈઃ ॥ ૮૪॥

ન કાઙ્ક્ષે વિજયં રામ ન ચ દારસુખાદિકમ્ ।
ભક્તિમેવ સદા કાઙ્ક્ષે ત્વયિ બન્ધવિમોચનીમ્ ॥ ૮૫॥

ત્વન્માયાકૃતસંસારસ્ત્વદંશોઽહં રઘૂત્તમ ।
સ્વપાદભક્તિમાદિશ્ય ત્રાહિ માં ભવસઙ્કટાત્ ॥ ૮૬॥

પૂર્વં મિત્રાર્યુદાસીનાસ્ત્વન્માયાવૃતચેતસઃ ।
આસન્મેઽદ્ય ભવત્પાદદર્શનાદેવ રાઘવ ॥ ૮૭॥

સર્વં બ્રહ્મૈવ મે ભાતિ ક્વ મિત્રં ક્વ ચ મે રિપુઃ ।
યાવત્ત્વન્માયયા બદ્ધસ્તાવદ્ગુણવિશેષતા ॥ ૮૮॥

સા યાવદસ્તિ નાનાત્વં તાવદ્ભવતિ નાન્યથા ।
યાવન્નાનાત્વમજ્ઞાનાત્તાવત્કાલકૃતં ભયમ્ ॥ ૮૯॥

અતોઽવિદ્યામુપાસ્તે યઃ સોઽન્ધે તમસિ મજ્જતિ ।
માયામૂલમિદં સર્વં પુત્રદારાદિબન્ધનમ્ ।

તદુત્સારય માયાં ત્વં દાસીં તવ રઘૂત્તમ ॥ ૯૦॥

ત્વત્પાદપદ્માર્પિતચિત્તવૃત્તિ-
 સ્ત્વન્નામસઙ્ગીતકથાસુ વાણી ।
ત્વદ્ભક્તસેવાનિરતૌ કરૌ મે
 ત્વદઙ્ગસઙ્ગં લભતાં મદઙ્ગમ્ ॥ ૯૧॥

ત્વન્મૂર્તિભક્તાન્ સ્વગુરું ચ ચક્ષુઃ
 પશ્યત્વજસ્રં સ શૃણોતુ કર્ણઃ ।
ત્વજ્જન્મકર્માણિ ચ પાદયુગ્મં
 વ્રજત્વજસ્રં તવ મન્દિરાણિ ॥ ૯૨॥

અઙ્ગાનિ તે પાદરજોવિમિશ્ર-
 તીર્થાનિ બિભ્રત્વહિશત્રુકેતો ।
શિરસ્ત્વદીયં ભવપદ્મજાદ્યૈ-
 ર્જુષ્ટં પદં રામ નમત્વજસ્રમ્ ॥ ૯૩॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે કિષ્કિન્ધાકાણ્ડે
પ્રથમઃ સર્ગઃ ॥ ૧॥

## ॥ દ્વિતીય સર્ગઃ ॥

ઇત્થં સ્વાત્મપરિષ્વઙ્ગનિર્ધૂતાશેષકલ્મષમ્ ।
રામઃ સુગ્રીવમાલોક્ય સસ્મિતં વાક્યમબ્રવીત્ ॥ ૧॥

માયાં મોહકરીં તસ્મિન્ વિતન્વન્ કાર્યસિદ્ધયે ।
સખે ત્વદુક્તં યત્તન્માં સત્યમેવ ન સંશયઃ ॥ ૨॥

કિન્તુ લોકા વદિષ્યન્તિ મામેવં રઘુનન્દનઃ ।
કૃતવાન્ કિં કપીન્દ્રાય સખ્યં કૃત્વાગ્નિસાક્ષિકમ્ ॥ ૩॥

ઇતિ લોકાપવાદો મે ભવિષ્યતિ ન સંશયઃ ।
તસ્માદાહ્વય ભદ્રં તે ગત્વા યુદ્ધાય વાલિનમ્ ॥ ૪॥

બાણેનૈકેન તં હત્વા રાજ્યે ત્વામભિષેચયે ।
તથેતિ ગત્વા સુગ્રીવઃ કિષ્કિન્ધોપવનં દ્રુતમ્ ॥ ૫॥

કૃત્વા શબ્દં મહાનાદં તમાહ્વયત વાલિનમ્ ।
તચ્છ્રુત્વા ભ્રાતૃનિનદં રોષતામ્રવિલોચનઃ ॥ ૬॥

નિર્જગામ ગૃહાચ્છીઘ્રં સુગ્રીવો યત્ર વાનરઃ ।
તમાપતન્તં સુગ્રીવઃ શીઘ્રં વક્ષસ્યતાડયત્ ॥ ૭॥

સુગ્રીવમપિ મુષ્ટિભ્યાં જઘાન ક્રોધમૂર્છિતઃ ।
વાલી તમપિ સુગ્રીવ એવં ક્રુદ્ધૌ પરસ્પરમ્ ॥ ૮॥

અયુદ્ધ્યેતામેકરૂપૌ દૃષ્ટ્વા રામોઽતિવિસ્મિતઃ ।
ન મુમોચ તદા બાણં સુગ્રીવવધશઙ્કયા ॥ ૯॥

તતો દુદ્રાવ સુગ્રીવો વમન્ રક્તં ભયાકુલઃ ।
વાલી સ્વભવનં યાતઃ સુગ્રીવો રામમબ્રવીત્ ॥ ૧૦॥

કિં માં ઘાતયસે રામ શત્રુણા ભ્રાતૃરૂપિણા ।
યદિ મદ્ધનને વાઞ્છા ત્વમેવ જહિ માં વિભો ॥ ૧૧॥

એવં મે પ્રત્યયં કૃત્વા સત્યવાદિન્ રઘૂત્તમ ।
ઉપેક્ષસે કિમર્થં માં શરણાગતવત્સલ ॥ ૧૨॥

શ્રુત્વા સુગ્રીવવચનં રામઃ સાશ્રુવિલોચનઃ ।
આલિઙ્ગ્ય મા સ્મ ભૈષીસ્ત્વં દૃષ્ટ્વા વામેકરૂપિણૌ ॥ ૧૩॥

મિત્રઘાતિત્વમાશઙ્ક્ય મુક્તવાન્ સાયકં ન હિ ।
ઇદાનીમેવ તે ચિહ્નં કરિષ્યે ભ્રમશાન્તયે ॥ ૧૪॥

ગત્વાહ્વય પુનઃ શત્રું હતં દ્રક્ષ્યસિ વાલિનમ્ ।
રામોઽહં ત્વાં શપે ભ્રાતર્હનિષ્યામિ રિપું ક્ષણાત્ ॥ ૧૫॥

ઇત્યાશ્વાસ્ય સ સુગ્રીવં રામો લક્ષ્મણમબ્રવીત્ ।
સુગ્રીવસ્ય ગલે પુષ્પમાલામામુચ્ય પુષ્પિતામ્ ॥ ૧૬॥

પ્રેષયસ્વ મહાભાગ સુગ્રીવં વાલિનં પ્રતિ ।
લક્ષ્મણસ્તુ તદા બદ્ધ્વા ગચ્છ ગચ્છેતિ સાદરમ્ ॥ ૧૭॥

પ્રેષયામાસ સુગ્રીવં સોઽપિ ગત્વા તથાકરોત્ ।
પુનરપ્યદ્ભુતં શબ્દં કૃત્વા વાલિનમાહ્વયત્ ॥ ૧૮॥

તચ્છ્રુત્વા વિસ્મિતો વાલી ક્રોધેન મહતાવૃતઃ ।
બદ્ધ્વા પરિકરં સમ્યગ્ગમનાયોપચક્રમે ॥ ૧૯॥

ગચ્છન્તં વાલિનં તારા ગૃહીત્વા નિષિષેધ તમ્ ।
ન ગન્તવ્યં ત્વયેદાનીં શઙ્કા મેઽતીવ જાયતે ॥ ૨૦॥

ઇદાનીમેવ તે ભગ્નઃ પુનરાયાતિ સત્વરઃ ।
સહાયો બલવાંસ્તસ્ય કશ્ચિન્નૂનં સમાગતઃ ॥ ૨૧॥

વાલી તામાહ હે સુભ્રુ શઙ્કા તે વ્યેતુ તદ્ગતા ।
પ્રિયે કરં પરિત્યજ્ય ગચ્છ ગચ્છામિ તં રિપુમ્ ॥ ૨૨॥

હત્વા શીઘ્રં સમાયાસ્યે સહાયસ્તસ્ય કો ભવેત્ ।
સહાયો યદિ સુગ્રીવસ્તતો હત્વોભયં ક્ષણાત્ ॥ ૨૩॥

આયાસ્યે મા શુચઃ શૂરઃ કથં તિષ્ઠેદ્ ગૃહે રિપુમ્ ।
જ્ઞાત્વાપ્યાહ્વયમાનં હિ હત્વાયાસ્યામિ સુન્દરિ ॥ ૨૪॥

તારોવાચ
મત્તોઽન્યચ્છૃણુ રાજેન્દ્ર શ્રુત્વા કુરુ યથોચિતમ્ ।
આહ મામઙ્ગદઃ પુત્રો મૃગયાયાં શ્રુતં વચઃ ॥ ૨૫॥

અયોધ્યાધિપતિઃ શ્રીમાન્ રામો દાશરથિઃ કિલ ।
લક્ષ્મણેન સહ ભ્રાત્રા સીતયા ભાર્યયા સહ ॥ ૨૬॥

આગતો દણ્ડકારણ્યં તત્ર સીતા હૃતા કિલ ।
રાવણેન સહ ભ્રાત્રા માર્ગમાણોઽથ જાનકીમ્ ॥ ૨૭॥

આગતો ઋષ્યમૂકાદ્રિં સુગ્રીવેણ સમાગતઃ ।
ચકાર તેન સુગ્રીવઃ સખ્યં ચાનલસાક્ષિકમ્ ॥ ૨૮॥

પ્રતિજ્ઞાં કૃતવાન્ રામઃ સુગ્રીવાય સલક્ષ્મણઃ ।
વાલિનં સમરે હત્વા રાજાનં ત્વાં કરોમ્યહમ્ ॥ ૨૯॥

ઇતિ નિશ્ચિત્ય તૌ યાતૌ નિશ્ચિતં શૃણુ મદ્વચઃ ।
ઇદાનીમેવ તે ભગ્નઃ કથં પુનરુપાગતઃ ॥ ૩૦॥

અતસ્ત્વં સર્વથા વૈરં ત્યક્ત્વા સુગ્રીવમાનય ।
યૌવરાજ્યેઽભિષિચ્યાશુ રામં ત્વં શરણં વ્રજ ॥ ૩૧॥

પાહિ મામઙ્ગદં રાજ્યં કુલં ચ હરિપુઙ્ગવ ।
ઇત્યુક્ત્વાશ્રુમુખી તારા પાદયોઃ પ્રણિપત્ય તમ્ ॥ ૩૨॥

હસ્તાભ્યાં ચરણૌ ધૃત્વા રુરોદ ભયવિહ્વલા ।
તામાલિઙ્ગ્ય તદા વાલી સસ્નેહમિદમબ્રવીત્ ॥ ૩૩॥

સ્ત્રીસ્વભાવાદ્બિભેષિ ત્વં પ્રિયે નાસ્તિ ભયં મમ ।
રામો યદિ સમાયાતો લક્ષ્મણેન સમં પ્રભુઃ ॥ ૩૪॥

તદા રામેણ મે સ્નેહો ભવિષ્યતિ ન સંશયઃ ।
રામો નારાયણઃ સાક્ષાદવતીર્ણોઽખિલપ્રભુઃ ॥ ૩૫॥

ભૂભારહરણાર્થાય શ્રુતં પૂર્વં મયાનઘે ।
સ્વપક્ષઃ પરપક્ષો વા નાસ્તિ તસ્ય પરાત્મનઃ ॥ ૩૬॥

આનેષ્યામિ ગૃહં સાધ્વિ નત્વા તચ્ચરણામ્બુજમ્ ।
ભજતોઽનુભજત્યેષ ભક્તિગમ્યઃ સુરેશ્વરઃ ॥ ૩૭॥

યદિ સ્વયં સમાયાતિ સુગ્રીવો હન્મિ તં ક્ષણાત્ ।
યદુક્તં યૌવરાજ્યાય સુગ્રીવસ્યાભિષેચનમ્ ॥ ૩૮॥

કથમાહૂયમાનોઽહં યુદ્ધાય રિપુણા પ્રિયે ।
શૂરોઽહં સર્વલોકાનાં સમ્મતઃ શુભલક્ષણે ॥ ૩૯॥

ભીતભીતમિદં વાક્યં કથં વાલી વદેત્પ્રિયે ।
તસ્માચ્છોકં પરિત્યજ્ય તિષ્ઠ સુન્દરિ વેશ્મનિ ॥ ૪૦॥

એવમાશ્વાસ્ય તારાં તાં શોચન્તીમશ્રુલોચનામ્ ।
ગતો વાલી સમુદ્યુક્તઃ સુગ્રીવસ્ય વધાય સઃ ॥ ૪૧॥

દૃષ્ટ્વા વાલિનમાયાન્તં સુગ્રીવો ભીમવિક્રમઃ ।
ઉત્પપાત ગલે બદ્ધપુષ્પમાલો મતઙ્ગવત્ ॥ ૪૨॥

મુષ્ટિભ્યાં તાડયામાસ વાલિનં સોઽપિ તં તથા ।
અહન્વાલી ચ સુગ્રીવં સુગ્રીવો વાલિનં તથા ॥ ૪૩॥

રામં વિલોકયન્નેવ સુગ્રીવો યુયુધે યુધિ ।
ઇત્યેવં યુદ્ધ્યમાનૌ તૌ દૃષ્ટ્વા રામઃ પ્રતાપવાન્ ॥ ૪૪॥

બાણમાદાય તૂણીરાદૈન્દ્રે ધનુષિ સન્દધે ।
આકૃષ્ય કર્ણપર્યન્તમદૃશ્યો વૃક્ષખણ્ડગઃ ॥ ૪૫॥

નિરીક્ષ્ય વાલિનં સમ્યગ્લક્ષ્યં તદ્ધૃદયં હરિઃ ।
ઉત્સસર્જાશનિસમં મહાવેગં મહાબલઃ ॥ ૪૬॥

બિભેદ સ શરો વક્ષો વાલિનઃ કમ્પયન્ મહીમ્ ।
ઉત્પપાત મહાશબ્દં મુઞ્ચન્ સ નિપપાત હ ॥ ૪૭॥

તદા મુહૂર્ત્તં નિઃસઞ્જ્ઞો ભૂત્વા ચેતનમાપ સઃ ।
તતો વાલી દદર્શાગ્રે રામં રાજીવલોચનમ્ ।
ધનુરાલમ્બ્ય વામેન હસ્તેનાન્યેન સાયકમ્ ॥ ૪૮॥

બિભ્રાણં ચીરવસનં જટામુકુટધારિણમ્ ।
વિશાલવક્ષસં ભ્રાજદ્વનમાલાવિભૂષિતમ્ ॥ ૪૯॥

પીનચાર્વાયતભૂજં નવદૂર્વાદલચ્છવિમ્ ।
સુગ્રીવલક્ષ્મણાભ્યાં ચ પાર્શ્વયોઃ પરિસેવિતમ્ ॥ ૫૦॥

વિલોક્ય શનકૈઃ પ્રાહ વાલી રામં વિગર્હયન્ ।
કિં મયાપકૃતં રામ તવ યેન હતોઽસ્મ્યહમ્ ॥ ૫૧॥

રાજધર્મમવિજ્ઞાય ગર્હિતં કર્મ તે કૃતમ્ ।
વૃક્ષખણ્ડે તિરોભૂત્વા ત્યજતા મયિ સાયકમ્ ॥ ૫૨॥

યશઃ કિં લપ્સ્યસે રામ ચોરવત્કૃતસઙ્ગરઃ ।
યદિ ક્ષત્રિયદાયાદો મનોર્વંશસમુદ્ભવઃ ॥ ૫૩॥

યુદ્ધં કૃત્વા સમક્ષં મે પ્રાપ્યસે તત્ફલં તદા ।
સુગ્રીવેણ કૃતં કિં તે મયા વા ન કૃતં કિમુ ॥ ૫૪॥

રાવણેન હૃતા ભાર્યા તવ રામ મહાવને ।
સુગ્રીવં શરણં યાતસ્તદર્થમિતિ શુશ્રુમ ॥ ૫૫॥

બત રામ ન જાનીષે મદ્બલં લોકવિશ્રુતમ્ ।
રાવણં સકુલં બદ્ધ્વા સસીતં લઙ્કયા સહ ॥ ૫૬॥

આનયામિ મુહૂર્ત્તાર્દ્ધાદ્યદિ ચેચ્છામિ રાઘવ ।
ધર્મિષ્ઠ ઇતિ લોકેઽસ્મિન્ કથ્યસે રઘુનન્દન ॥ ૫૭॥

વાનરં વ્યાધવદ્ધત્વા ધર્મં કં લપ્સ્યસે વદ ।
અભક્ષ્યં વાનરં માંસં હત્વા માં કિં કરિષ્યસિ ॥ ૫૮॥

ઇત્યેવં બહુ ભાષન્તં વાલિનં રાઘવોઽબ્રવીત્ ।
ધર્મસ્ય ગોપ્તા લોકેઽસ્મિંશ્ચરામિ સશરાસનઃ ॥ ૫૯॥

અધર્મકારિણં હત્વા સદ્ધર્મં પાલયામ્યહમ્ ।
દુહિતા ભગિની ભ્રાતુર્ભાર્યા ચૈવ તથા સ્નુષા ॥ ૬૦॥

સમા યો રમતે તાસામેકામપિ વિમૂઢધીઃ ।
પાતકી સ તુ વિજ્ઞેયઃ સ વધ્યો રાજભિઃ સદા ॥ ૬૧॥

ત્વં તુ ભ્રાતુઃ કનિષ્ઠસ્ય ભાર્યાયાં રમસે બલાત્ ।
અતો મયા ધર્મવિદા હતોઽસિ વનગોચર ॥ ૬૨॥

ત્વં કપિત્વાન્ન જાનીષે મહાન્તો વિચરન્તિ યત્ ।
લોકં પુનાનાઃ સઞ્ચારૈરતસ્તાન્નાતિભાષયેત્ ॥ ૬૩॥

તચ્છ્રુત્વા ભયસન્ત્રસ્તો જ્ઞાત્વા રામં રમાપતિમ્ ।
વાલી પ્રણમ્ય રભસાદ્રામં વચનમબ્રવીત્ ॥ ૬૪॥

રામ રામ મહાભાગ જાને ત્વાં પરમેશ્વરમ્ ।
અજાનતા મયા કિઞ્ચિદુક્તં તત્ક્ષન્તુમર્હસિ ॥ ૬૫॥

સાક્ષાત્ત્વચ્છરઘાતેન વિશેષેણ તવાગ્રતઃ ।
ત્યજામ્યસૂન્ મહાયોગિદુર્લભં તવ દર્શનમ્ ॥ ૬૬॥

યન્નામ વિવશો ગૃહ્ણન્ મ્રિયમાણઃ પરં પદમ્ ।
યાતિ સાક્ષાત્સ એવાદ્ય મુમૂર્ષોર્મે પુરઃ સ્થિતઃ ॥ ૬૭॥

દેવ જાનામિ પુરુષં ત્વાં શ્રિયં જાનકીં શુભામ્ ।
રાવણસ્ય વધાર્થાય જાતં ત્વાં બ્રહ્મણાર્થિતમ્ ॥ ૬૮॥

અનુજાનીહિ માં રામ યાન્તં ત્વત્પદમુત્તમમ્ ।
મમ તુલ્યબલે બાલે અઙ્ગદે ત્વં દયાં કુરુ ॥ ૬૯॥

વિશલ્યં કુરુ મે રામ હૃદયં પાણિના સ્પૃશન્ ।
તથેતિ બાણમુદ્ધૃત્ય રામઃ પસ્પર્શ પાણિના ।
ત્યક્ત્વા તદ્વાનરં દેહમમરેન્દ્રોઽભવત્ક્ષણાત્ ॥ ૭૦॥

વાલી રઘૂત્તમશરાભિહતો વિમૃષ્ટો
રામેણ શીતલકરેણ સુખાકરેણ ।
સદ્યો વિમુચ્ય કપિદેહમનન્યલભ્યં
પ્રાપ્તં પદં પરમહંસગણૈર્દુરાપમ્ ॥ ૭૧॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે કિષ્કિન્ધાકાણ્ડે

દ્વિતીયઃ સર્ગઃ ॥ ૨॥

## ॥ તૃતીય સર્ગઃ ॥

નિહતે વાલિનિ રણે રામેણ પરમાત્મના ।
દુદ્રુવુર્વાનરાઃ સર્વે કિષ્કિન્ધાં ભયવિહ્વલાઃ ॥ ૧॥

તારામૂચુર્મહાભાગે હતો વાલી રણાજિરે ।
અઙ્ગદં પરિરક્ષાદ્ય મન્ત્રિણઃ પરિનોદય ॥ ૨॥

ચતુર્દ્વારકપાટાદીન્ બદ્ધ્વા રક્ષામહે પુરીમ્ ।
વાનરાણાં તુ રાજાનમઙ્ગદં કુરુ ભામિનિ ॥ ૩॥

નિહતં વાલિનં શ્રુત્વા તારા શોકવિમૂર્છિતા ।
અતાડયત્સ્વપાણિભ્યાં શિરો વક્ષશ્ચ ભૂરિશઃ ॥ ૪॥

કિમઙ્ગદેન રાજ્યેન નગરેણ ધનેન વા ।
ઇદાનીમેવ નિધનં યાસ્યામિ પતિના સહ ॥ ૫॥

ઇત્યુક્ત્વા ત્વરિતા તત્ર રુદતી મુક્તમૂર્ધજા ।
યયૌ તારાઽતિશોકાર્તા યત્ર ભર્તૃકલેવરમ્ ॥ ૬॥

પતિતં વાલિનં દૃષ્ટ્વા રક્તૈઃ પાંસુભિરાવૃતમ્ ।
રુદતી નાથનાથેતિ પતિતા તસ્ય પાદયોઃ ॥ ૭॥

કરુણં વિલપન્તી સા દદર્શ રઘુનન્દનમ્ ।
રામ માં જહિ બાણેન યેન વાલી હતસ્ત્વયા ॥ ૮॥

ગચ્છામિ પતિસાલોક્યં પતિર્મામભિકાઙ્ક્ષતે ।
સ્વર્ગેઽપિ ન સુખં તસ્ય માં વિના રઘુનન્દન ॥ ૯॥

પત્નીવિયોગજં દુઃખમનુભૂતં ત્વયાનઘ ।
વાલિને માં પ્રયચ્છાશુ પત્નીદાનફલં ભવેત્ ॥ ૧૦॥

સુગ્રીવ ત્વં સુખં રાજ્યં દાપિતં વાલિઘાતિના ।
રામેણ રુમયા સાર્ધં ભુઙ્ક્ષ્વ સાપત્નવર્જિતમ્ ॥ ૧૧॥

ઇત્યેવં વિલપન્તીં તાં તારાં રામો મહામનાઃ ।

સાન્ત્વયામાસ દયયા તત્ત્વજ્ઞાનોપદેશતઃ ॥ ૧૨॥

કિં ભીરુ શોચસિ વ્યર્થં શોકસ્યાવિષયં પતિમ્ ।
પતિસ્તવાયં દેહો વા જીવો વા વદ તત્ત્વતઃ ॥ ૧૩॥

પઞ્ચાત્મકો જડો દેહસ્ત્વઙ્માંસરુધિરાસ્થિમાન્ ।
કાલકર્મગુણોત્પન્નઃ સોઽપ્યાસ્તેઽદ્યાપિ તે પુરઃ ॥ ૧૪॥

મન્યસે જીવમાત્માનં જીવસ્તર્હિ નિરામયઃ ।
ન જાયતે ન મ્રિયતે ન તિષ્ઠતિ ન ગચ્છતિ ॥ ૧૫॥

ન સ્ત્રી પુમાન્વા ષણ્ઢો વા જીવઃ સર્વગતોઽવ્યયઃ ।
એક એવાદ્વિતીયોઽયમાકાશવદલેપકઃ ।
નિત્યો જ્ઞાનમયઃ શુદ્ધઃ સ કથં શોકમર્હતિ ॥ ૧૬॥

તારોવાચ
દેહોઽચિત્કાષ્ઠવદ્રામ જીવો નિત્યશ્ચિદાત્મકઃ ।
સુખદુઃખાદિસમ્બન્ધઃ કસ્ય સ્યાદ્રામ મે વદ ॥ ૧૭॥

શ્રીરામ ઉવાચ ।
અહઙ્કારાદિસમ્બન્ધો યાવદ્દેહેન્દ્રિયૈઃ સહ ।
સંસારસ્તાવદેવ સ્યાદાત્મનસ્ત્વવિવેકિનઃ ॥ ૧૮॥

મિથ્યારોપિતસંસારો ન સ્વયં વિનિવર્તતે ।
વિષયાન્ ધ્યાયમાનસ્ય સ્વપ્ને મિથ્યાગમો યથા ॥ ૧૯॥

અનાદ્યવિદ્યાસમ્બન્ધાત્તત્કાર્યાહઙ્કૃતેસ્તથા ।
સંસારોઽપાર્થકોઽપિ સ્યાદ્રાગદ્વેષાદિસઙ્કુલઃ ॥ ૨૦॥

મન એવ હિ સંસારો બન્ધશ્ચૈવ મનઃ શુભે ।
આત્મા મનઃસમાનત્વમેત્ય તદ્ગતબન્ધભાક્ ॥ ૨૧॥

યથા વિશુદ્ધઃ સ્ફટિકોઽલક્તકાદિસમીપગઃ ।
તત્તદ્વર્ણયુગાભાતિ વસ્તુતો નાસ્તિ રઞ્જનમ્ ॥ ૨૨॥

બુદ્ધીન્દ્રિયાદિસામીપ્યાદાત્મનઃ સંસૃતિર્બલાત્ ।
આત્મા સ્વલિઙ્ગં તુ મનઃ પરિગૃહ્ય તદુદ્ભવાન્ ॥ ૨૩॥

કામાન્ જુષન્ ગુણૈર્બદ્ધઃ સંસારે વર્તતેઽવશઃ ।
આદૌ મનોગુણાન્ સૃષ્ટ્વા તતઃ કર્માણ્યનેકધા ॥ ૨૪॥

શુક્લલોહિતકૃષ્ણાનિ ગતયસ્તત્સમાનતઃ ।
એવં કર્મવશાજ્જીવો ભ્રમત્યાભૂતસમ્પ્લવમ્ ॥ ૨૫॥

સર્વોપસંહૃતૌ જીવો વાસનાભિઃ સ્વકર્મભિઃ ।
અનાદ્યવિદ્યાવશગસ્તિષ્ઠત્યભિનિવેશતઃ ॥ ૨૬॥

સૃષ્ટિકાલે પુનઃ પૂર્વવાસનામાનસૈઃ સહ ।
જાયતે પુનરપ્યેવં ઘટીયન્ત્રમિવાવશઃ ॥ ૨૭॥

યદા પુણ્યવિશેષેણ લભતે સઙ્ગતિં સતામ્ ।
મદ્ભક્તાનાં સુશાન્તાનાં તદા મદ્વિષયા મતિઃ ॥ ૨૮॥

મત્કથાશ્રવણે શ્રદ્ધા દુર્લભા જાયતે તતઃ ।
તતઃ સ્વરૂપવિજ્ઞાનમનાયાસેન જાયતે ॥ ૨૯॥

તદાચાર્યપ્રસાદેન વાક્યાર્થજ્ઞાનતઃ ક્ષણાત્ ।
દેહેન્દ્રિયમનઃપ્રાણાહઙ્કૃતિભ્યઃ પૃથક્ સ્થિતમ્ ॥ ૩૦॥

સ્વાત્માનુભવતઃ સત્યમાનન્દાત્માનમદ્વયમ્ ।
જ્ઞાત્વા સદ્યો ભવેન્મુક્તઃ સત્યમેવ મયોદિતમ્ ॥ ૩૧॥

એવં મયોદિતં સમ્યગાલોચયતિ યોઽનિશમ્ ।
તસ્ય સંસારદુઃખાનિ ન સ્પૃશન્તિ કદાચન ॥ ૩૨॥

ત્વમપ્યેતન્મયા પ્રોક્તમાલોચય વિશુદ્ધધીઃ ।
ન સ્પૃશ્યસે દુઃખજાલૈઃ કર્મબન્ધાદ્વિમોક્ષ્યસે ॥ ૩૩॥

પૂર્વજન્મનિ તે સુભ્રુ કૃતા મદ્ભક્તિરુત્તમા ।
અતસ્તવ વિમોક્ષાય રૂપં મે દર્શિતં શુભે ॥ ૩૪॥

ધ્યાત્વા મદ્રૂપમનિશમાલોચય મયોદિતમ્ ।
પ્રવાહપતિતં કાર્યં કુર્વન્ત્યપિ ન લિપ્યસે ॥ ૩૫॥

શ્રીરામેણોદિતં સર્વં શ્રુત્વા તારાતિવિસ્મિતા ।
દેહાભિમાનજં શોકં ત્યક્ત્વા નત્વા રઘૂત્તમમ્ ॥ ૩૬॥

આત્માનુભવસન્તુષ્ટા જીવન્મુક્તા બભૂવ હ ।
ક્ષણસઙ્ગમમાત્રેણ રામેણ પરમાત્મના ॥ ૩૭॥

અનાદિબન્ધં નિર્ધૂય મુક્તા સાપિ વિકલ્મષા ।
સુગ્રીવોઽપિ ચ તચ્છ્રુત્વા રામવક્ત્રાત્સમીરિતમ્ ॥ ૩૮॥

જહાવજ્ઞાનમખિલં સ્વસ્થચિત્તોઽભવત્તદા ।
તતઃ સુગ્રીવમાહેદં રામો વાનરપુઙ્ગવમ્ ॥ ૩૯॥

ભ્રાતુર્જ્યેષ્ઠસ્ય પુત્રેણ યદુક્તં સામ્પરાયિકમ્ ।
કુરુ સર્વં યથાન્યાયં સંસ્કારાદિ મમાજ્ઞયા ॥ ૪૦॥

તથેતિ બલિભિર્મુખ્યૈર્વાનરૈઃ પરિણીય તમ્ ।
વાલિનં પુષ્પકે ક્ષિપ્ત્વા સર્વરાજોપચારકૈઃ ॥ ૪૧॥

ભેરીદુન્દુભિનિર્ઘોષૈર્બ્રાહ્મણૈર્મન્ત્રિભિઃ સહ ।
યૂથપૈર્વાનરૈઃ પૌરૈસ્તારયા ચાઙ્ગદેન ચ ॥ ૪૨॥

ગત્વા ચકાર તત્સર્વં યથાશાસ્ત્રં પ્રયત્નતઃ ।
સ્નાત્વા જગામ રામસ્ય સમીપં મન્ત્રિભિઃ સહ ॥ ૪૩॥

નત્વા રામસ્ય ચરણૌ સુગ્રીવઃ પ્રાહ હૃષ્ટધીઃ ।
રાજ્યં પ્રશાધિ રાજેન્દ્ર વાનરાણાં સમૃદ્ધિમત્ ॥ ૪૪॥

દાસોઽહં તે પાદપદ્મં સેવે લક્ષ્મણવચ્ચિરમ્ ।
ઇત્યુક્તો રાઘવઃ પ્રાહ સુગ્રીવં સસ્મિતં વચઃ ॥ ૪૫॥

ત્વમેવાહં ન સન્દેહઃ શીઘ્રં ગચ્છ મમાજ્ઞયા ।
પુરરાજ્યાધિપત્યે ત્વં સ્વાત્માનમભિષેચય ॥ ૪૬॥

નગરં ન પ્રવેક્ષ્યામિ ચતુર્દશ સમાઃ સખે ।
આગમિષ્યતિ મે ભ્રાતા લક્ષ્મણઃ પત્તનં તવ ॥ ૪૭॥

અઙ્ગદં યૌવરાજ્યે ત્વમભિષેચય સાદરમ્ ।
અહં સમીપે શિખરે પર્વતસ્ય સહાનુજઃ ॥ ૪૮॥

વત્સ્યામિ વર્ષદિવસાંસ્તતસ્ત્વં યત્નવાન્ ભવ ।
કિઞ્ચિત્કાલં પુરે સ્થિત્વા સીતાયાઃ પરિમાર્ગણે ॥ ૪૯॥

સાષ્ટાઙ્ગં પ્રણિપત્યાહ સુગ્રીવો રામપાદયોઃ ।
યદાજ્ઞાપયસે દેવ તત્તથૈવ કરોમ્યહમ્ ॥ ૫૦॥

અનુજ્ઞાતશ્ચ રામેણ સુગ્રીવસ્તુ સલક્ષ્મણઃ ।
ગત્વા પુરં તથા ચક્રે યથા રામેણ ચોદિતઃ ॥ ૫૧॥

સુગ્રિવેણ યથાન્યાયં પૂજિતો લક્ષ્મણસ્તદા ।

આગત્ય રાઘવં શીઘ્રં પ્રણિપત્યોપતસ્થિવાન્ ॥ ૫૨॥

તતો રામો જગામાશુ લક્ષ્મણેન સમન્વિતઃ ।
પ્રવર્ષણગિરેરૂર્ધ્વં શિખરં ભૂરિવિસ્તરમ્ ॥ ૫૩॥

તત્રૈકં ગહ્વરં દૃષ્ટ્વા સ્ફાટિકં દીપ્તિમચ્છુભમ્ ।
વર્ષવાતાતપસહં ફલમૂલસમીપગમ્ ।
વાસાય રોચયામાસ તત્ર રામઃ સલક્ષ્મણઃ ॥ ૫૪॥

દિવ્યમૂલફલપુષ્પસંયુતે મૌક્તિકોપમજલૌઘપલ્વલે ।
ચિત્રવર્ણમૃગપક્ષિશોભિતે પર્વતે રઘુકુલોત્તમોઽવસત્ ॥ ૫૫॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે કિષ્કિન્ધાકાણ્ડે
તૃતીયઃ સર્ગઃ ॥ ૩॥

## ॥ ચતુર્થ સર્ગઃ ॥

તત્ર વાર્ષિકદિનાનિ રાઘવો લીલયા મણિગુહાસુ સઞ્ચરન્ ।
પક્વમૂલફલભોગતોષિતો લક્ષ્મણેન સહિતોઽવસત્સુખમ્ ॥ ૧॥

વાતનુન્નજલપૂરિતમેઘાનન્તરસ્તનિતવૈદ્યુતગર્ભાન્ ।
વીક્ષ્ય વિસ્મયમગાદ્ગજયૂથાન્ યદ્વદાહિતસુકાઞ્ચનકક્ષાન્ ॥ ૨॥

નવઘાસં સમાસ્વાદ્ય હૃષ્ટપુષ્ટમૃગદ્વિજાઃ ।
ધાવન્તો પરિતો રામં વીક્ષ્ય વિસ્ફારિતેક્ષણાઃ ॥ ૩॥

ન ચલન્તિ સદા ધ્યાનનિષ્ઠા ઇવ મુનીશ્વરાઃ ।
રામં માનુષરૂપેણ ગિરિકાનનભૂમિષુ ॥ ૪॥

ચરન્તં પરમાત્માનં જ્ઞાત્વા સિદ્ધગણા ભુવિ ।
મૃગપક્ષિગણા ભૂત્વા રામમેવાનુસેવિરે ॥ ૫॥

સૌમિત્રિરેકદા રામમેકાન્તે ધ્યાનતત્પરમ્ ।
સમાધિવિરમે ભક્ત્યા પ્રણયાદ્વિનયાન્વિતઃ ॥ ૬॥

અબ્રવીદ્દેવ તે વાક્યાત્પૂર્વોક્તાદ્વિગતો મમ ।
અનાદ્યવિદ્યાસમ્ભૂતઃ સંશયો હૃદિ સંસ્થિતઃ ॥ ૭॥

ઇદાનીં શ્રોતુમિચ્છામિ ક્રિયામાર્ગેણ રાઘવ ।
ભવદારાધનં લોકે યથા કુર્વન્તિ યોગિનઃ ॥ ૮॥

ઇદમેવ સદા પ્રાહુર્યોગિનો મુક્તિસાધનમ્ ।
નારદોઽપિ તથા વ્યાસો બ્રહ્મા કમલસમ્ભવઃ ॥ ૯॥

બ્રહ્મક્ષત્રાદિવર્ણાનામાશ્રમાણાં ચ મોક્ષદમ્ ।
સ્ત્રીશૂદ્રાણાં ચ રાજેન્દ્ર સુલભં  મુક્તિસાધનમ્ ।
તવ ભક્તાય મે ભ્રાત્રે બ્રૂહિ લોકોપકારકમ્ ॥ ૧૦॥

શ્રીરામ ઉવાચ ।
મમ પૂજાવિધાનસ્ય નાન્તોઽસ્તિ રઘુનન્દન ।
તથાપિ વક્ષ્યે સઙ્ક્ષેપાદ્યથાવદનુપૂર્વશઃ ॥ ૧૧॥

સ્વગૃહ્યોક્તપ્રકારેણ દ્વિજત્વં પ્રાપ્ય માનવઃ ।
સકાશાત્સદ્ગુરોર્મન્ત્રં લબ્ધ્વા મદ્ભક્તિસંયુતઃ ॥ ૧૨॥

તેન સન્દર્શિતવિધિર્મામેવારાધયેત્સુધીઃ ।
હૃદયે વાઽનલે વાર્ચેત્પ્રતિમાદૌ વિભાવસૌ ॥ ૧૩॥

શાલગ્રામશિલાયાં વા પૂજયેન્મામતન્દ્રિતઃ ।
પ્રાતઃસ્નાનં પ્રકુર્વીત પ્રથમં દેહશુદ્ધયે ॥ ૧૪॥

વેદતન્ત્રોદિતૈર્મન્ત્રૈર્મૃલ્લેપનવિધાનતઃ ।
સન્ધ્યાદિ કર્મ યન્નિત્યં તત્કુર્યાદ્વિધિના બુધઃ ॥ ૧૫॥

સઙ્કલ્પમાદૌ કુર્વીત સિદ્ધ્યર્થં કર્મણાં સુધીઃ ।
સ્વગુરું પૂજયેદ્ભક્ત્યા મદ્બુદ્ધ્યા પૂજકો મમ ॥ ૧૬॥

શિલાયાં સ્નપનં કુર્યાત્પ્રતિમાસુ પ્રમાર્જનમ્ ।
પ્રસિદ્ધૈર્ગન્ધપુષ્પાદ્યૈર્મત્પૂજા સિદ્ધિદાયિકા ॥ ૧૭॥

અમાયિકોઽનુવૃત્ત્યા માં પૂજયેન્નિયતવ્રતઃ ।
પ્રતિમાદિષ્વલઙ્કારઃ પ્રિયો મે કુલનન્દન ॥ ૧૮॥

અગ્નૌ યજેત હવિષા ભાસ્કરે સ્થણ્ડિલે યજેત્ ।
ભક્તેનોપહૃતં પ્રીત્યૈ શ્રદ્ધયા મમ વાર્યપિ ॥ ૧૯॥

કિં પુનર્ભક્ષ્યભોજ્યાદિ ગન્ધપુષ્પાક્ષતાદિકમ્ ।
પૂજાદ્રવ્યાણિ સર્વાણિ સમ્પાદ્યૈવં સમારભેત્ ॥ ૨૦॥

ચૈલાજિનકુશૈઃ સમ્યગાસનં પરિકલ્પયેત્ ।
તત્રોપવિશ્ય દેવસ્ય સમ્મુખે શુદ્ધમાનસઃ ॥ ૨૧॥

તતો ન્યાસં પ્રકૂર્વીત માતૃકાબહિરાન્તરમ્ ।
કેશવાદિ તતઃ કુર્યાત્તત્ત્વન્યાસં તતઃ પરમ્ ॥ ૨૨॥

મન્મૂર્તિપઞ્જરન્યાસં મન્ત્રન્યાસં તતો ન્યસેત્ ।
પ્રતિમાદાવપિ તથા કુર્યાન્નિત્યમતન્દ્રિતઃ ॥ ૨૩॥

કલશં સ્વપુરો વામે ક્ષિપેત્પુષ્પાદિ દક્ષિણે ।
અર્ઘ્યપાદ્યપ્રદાનાર્થં મધુપર્કાર્થમેવ ચ ॥ ૨૪॥

તથૈવાચમનાર્થં તુ ન્યસેત્પાત્રચતુષ્ટયમ્ ।
હૃત્પદ્મે ભાનુવિમલે મત્કલાં જીવસઞ્જ્ઞિતામ્ ॥ ૨૫॥

ધ્યાયેત્સ્વદેહમખિલં તયા વ્યાપ્તમરિન્દમ ।
તામેવાવાહયેન્નિત્યં પ્રતિમાદિષુ મત્કલામ્ ॥ ૨૬॥

પાદ્યાર્ઘ્યાચમનીયાદ્યૈઃ સ્નાનવસ્ત્રવિભૂષણૈઃ ।
યાવચ્છક્યોપચારૈર્વા ત્વર્ચયેન્મામમાયયા ॥ ૨૭॥

વિભવે સતિ કર્પૂરકુઙ્કુમાગરુચન્દનૈઃ ।
અર્ચયેન્મન્ત્રવન્નિત્યં સુગન્ધકુસુમૈઃ શુભૈઃ ॥ ૨૮॥

દશાવરણપૂજાં વૈ હ્યાગમોક્તાં પ્રકારયેત્ ।
નીરાજનૈર્ધૂપદીપૈર્નૈવેદ્યૈર્બહુવિસ્તરૈઃ ॥ ૨૯॥

શ્રદ્ધયોપહરેન્નિત્યં શ્રદ્ધાભુગહમીશ્વરઃ ।
હોમં કુર્યાત્પ્રયત્નેન વિધિના મન્ત્રકોવિદઃ ॥ ૩૦॥

અગસ્ત્યેનોક્તમાર્ગેણ કુણ્ડેનાગમવિત્તમઃ ।
જુહુયાન્મૂલમન્ત્રેણ પુંસૂક્તેનાથવા બુધઃ ॥ ૩૧॥

અથવૌપાસનાગ્નૌ વા ચરુણા હવિષા તથા ।
તપ્તજામ્બૂનદપ્રખ્યં દિવ્યાભરણભૂષિતમ્ ॥ ૩૨॥

ધ્યાયેદનલમધ્યસ્થં હોમકાલે સદા બુધઃ ।
પાર્ષદેભ્યો બલિં દત્ત્વા હોમશેષં સમાપયેત્ ॥ ૩૩॥

તતો જપં પ્રકુર્વીત ધ્યાયેન્માં યતવાક્ સ્મરન્ ।
મુખવાસં ચ તામ્બૂલં દત્ત્વા પ્રીતિસમન્વિતઃ ॥ ૩૪॥

મદર્થે નૃત્યગીતાદિ સ્તુતિપાઠાદિ કારયેત્ ।
પ્રણમેદ્દણ્ડવદ્ભૂમૌ હૃદયે માં નિધાય ચ ॥ ૩૫॥

શિરસ્યાધાય મદ્દત્તં પ્રસાદં ભાવનામયમ્ ।
પાણિભ્યાં મત્પદે મૂર્ધ્નિ ગૃહીત્વા ભક્તિસંયુતઃ ॥ ૩૬॥

રક્ષ માં ઘોરસંસારાદિત્યુક્ત્વા પ્રણમેત્સુધીઃ ।
ઉદ્વાસયેદ્યથાપૂર્વં પ્રત્યગ્જ્યોતિષિ સંસ્મરન્ ॥ ૩૭॥

એવમુક્તપ્રકારેણ પૂજયેદ્વિધિવદ્યદિ ।
ઇહામૂત્ર ચ સંસિદ્ધિં પ્રાપ્નોતિ મદનુગ્રહાત્ ॥ ૩૮॥

મદ્ભક્તો યદિ મામેવં પૂજાં ચૈવ દિને દિને ।
કરોતિ મમ સારૂપ્યં પ્રાપ્નોત્યેવ ન સંશયઃ ॥ ૩૯॥

ઇદં રહસ્યં પરમં ચ પાવનં
મયૈવ સાક્ષાત્કથિતં સનાતનમ્ ।
પઠત્યજસ્રં યદિ વા શૃણોતિ યઃ
સ સર્વપૂજાફલભાઙ્ ન સંશયઃ ॥ ૪૦॥

એવં પરાત્મા શ્રીરામઃ ક્રિયાયોગમનુત્તમમ્ ।
પૃષ્ટઃ પ્રાહ સ્વભક્તાય શેષાંશાય મહાત્મને ॥ ૪૧॥

પુનઃ પ્રાકૃતવદ્રામો માયામાલમ્બ્ય દુઃખિતઃ ।
હા સીતેતિ વદન્નૈવ નિદ્રાં લેભે કથઞ્ચન ॥ ૪૨॥

એતસ્મિન્નન્તરે તત્ર કિષ્કિન્ધાયાં સુબુદ્ધિમાન્ ।
હનૂમાન્ પ્રાહ સુગ્રીવમેકાન્તે કપિનાયકમ્ ॥ ૪૩॥

શૃણુ રાજન્ પ્રવક્ષ્યામિ તવૈવ હિતમુત્તમમ્ ।
રામેણ તે કૃતઃ પૂર્વમુપકારો હ્યનુત્તમઃ ॥ ૪૪॥

કૃતઘ્નવત્ત્વયા નૂનં વિસ્મૃતઃ પ્રતિભાતિ મે ।
ત્વત્કૃતે નિહતો વાલી વીરસ્ત્રૈલોક્યસમ્મતઃ ॥ ૪૫॥

રાજ્યે પ્રતિષ્ઠિતોઽસિ ત્વં તારાં પ્રાપ્તોઽસિ દુર્લભામ્ ।
સ રામઃ પર્વતસ્યાગ્રે ભ્રાત્રા સહ વસન્ સુધીઃ ॥ ૪૬॥

ત્વદાગમનમેકાગ્રમીક્ષતે કાર્યગૌરવાત્ ।

ત્વં તુ વાનરભાવેન સ્ત્રીસક્તો નાવબુદ્ધ્યસે ॥ ૪૭॥

કરોમીતિ પ્રતિજ્ઞાય સીતાયાઃ પરિમાર્ગણમ્ ।
ન કરોષિ કૃતઘ્નસ્ત્વં હન્યસે વાલિવદ્ધ્રુતમ્ ॥ ૪૮॥

હનૂમદ્વચનં શ્રુત્વા સુગ્રીવો ભયવિહ્વલઃ ।
પ્રત્યુવાચ હનૂમન્તં સત્યમેવ ત્વયોદિતમ્ ॥ ૪૯॥

શીઘ્રં કુરુ મમાજ્ઞાં ત્વં વાનરાણાં તરસ્વિનામ્ ।
સહસ્રાણિ દશેદાનીં પ્રેષયાશુ દિશો દશ ॥ ૫૦॥

સપ્તદ્વીપગતાન્ સર્વાન્ વાનરાનાનયન્તુ તે ।
પક્ષમધ્યે સમાયાન્તુ સર્વે વાનરપુઙ્ગવાઃ ॥ ૫૧॥

યે પક્ષમતિવર્તન્તે તે વધ્યા મે ન સંશયઃ ।
ઇત્યાજ્ઞાપ્ય હનૂમન્તં સુગ્રીવો ગૃહમાવિશત્ ॥ ૫૨॥

સુગ્રીવાજ્ઞાં પુરસ્કૃત્ય હનૂમાન્ મન્ત્રિસત્તમઃ ।
તત્ક્ષણે પ્રેષયામાસ હરીન્ દશ દિશઃ સુધીઃ ॥ ૫૩॥

અગણિતગુણસત્ત્વાન્ વાયુવેગપ્રચારાન્
વનચરગણમુખ્યાન્ પર્વતાકારરૂપાન્ ।
પવનહિતકુમારઃ પ્રેષયામાસ દૂતા-
નતિરભસતરાત્મા દાનમાનાદિતૃપ્તાન્ ॥ ૫૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે કિષ્કિન્ધાકાણ્ડે
ચતુર્થઃ સર્ગઃ ॥ ૪॥

## ॥ પઞ્ચમ સર્ગઃ ॥

રામસ્તુ પર્વતસ્યાગ્રે મણિસાનૌ નિશામુખે ।
સીતાવિરહજં શોકમસહન્નિદમબ્રવીત્ ॥ ૧॥

પશ્ય લક્ષ્મણ મે સીતા રાક્ષસેન હૃતા બલાત્ ।
મૃતાઽમૃતા વા નિશ્ચેતું ન જાનેઽદ્યાપિ ભામિનીમ્ ॥ ૨॥

જીવતીતિ મમ બ્રૂયાત્કશ્ચિદ્વા પ્રિયકૃત્ સ મે ।
યદિ જાનામિ તાં સાધ્વીં જીવન્તીં યત્ર કુત્ર વા ॥ ૩॥

હઠાદેવાહરિષ્યામિ સુધામિવ પયોનિધેઃ ।
પ્રતિજ્ઞાં શૃણુ મે ભ્રાતર્યેન મે જનકાત્મજા ॥ ૪॥

નીતા તં ભસ્મસાત્કુર્યાં સપુત્રબલવાહનમ્ ।
હે સીતે ચન્દ્રવદને વસન્તી રાક્ષસાલયે ॥ ૫॥

દુઃખાર્ત્તા મામપશ્યન્તી કથં પ્રાણાન્ ધરિષ્યસિ ।
ચન્દ્રોઽપિ ભાનુવદ્ભાતિ મમ ચન્દ્રાનનાં વિના ॥ ૬॥

ચન્દ્ર ત્વં જાનકીં સ્પૃષ્ટ્વા કરૈર્માં સ્પૃશ શીતલૈઃ ।
સુગ્રીવોઽપિ દયાહીનો દુઃખિતં માં ન પશ્યતિ ॥ ૭॥

રાજ્યં નિષ્કણ્ટકં પ્રાપ્ય સ્ત્રીભિઃ પરિવૃતો રહઃ ।
કૃતઘ્નો દૃશ્યતે વ્યક્તં પાનાસક્તોઽતિકામુકઃ ॥ ૮॥

નાયાતિ શરદં પશ્યન્નપિ માર્ગયિતું પ્રિયામ્ ।
પૂર્વોપકારિણં દુષ્ટઃ કૃતઘ્નો વિસ્મૃતો હિ મામ્ ॥ ૯॥

હન્મિ સુગ્રીવમપ્યેવં સપુરં સહબાન્ધવમ્ ।
વાલી યથા હતો મેઽદ્ય સુગ્રીવોઽપિ તથા ભવેત્ ॥ ૧૦॥

ઇતિ રુષ્ટં સમાલોક્ય રાઘવં લક્ષ્મણોઽબ્રવીત્ ।
ઇદાનીમેવ ગત્વાહં સુગ્રીવં દુષ્ટમાનસમ્ ॥ ૧૧॥

મામાજ્ઞાપય હત્વા તમાયાસ્યે રામ તેઽન્તિકમ્ ।
ઇત્યુક્ત્વા ધનુરાદાય સ્વયં તૂણીરમેવ ચ ॥ ૧૨॥

ગન્તુમભ્યુદ્યતં વીક્ષ્ય રામો લક્ષ્મણમબ્રવીત્ ।
ન હન્તવ્યસ્ત્વયા વત્સ સુગ્રીવો મે પ્રિયઃ સખા ॥ ૧૩॥

કિન્તુ ભીષય સુગ્રીવં વાલિવત્ત્વં હનિષ્યસે ।
ઇત્યુક્ત્વા શીઘ્રમાદાય સુગ્રીવપ્રતિભાષિતમ્ ॥ ૧૪॥

આગત્ય પશ્ચાદ્યત્કાર્યં તત્કરિષ્યામ્યસંશયમ્ ।
તથેતિ લક્ષ્મણોઽગચ્છત્ત્વરિતો ભીમવિક્રમઃ ॥ ૧૫॥

કિષ્કિન્ધાં પ્રતિ કોપેન નિર્દહન્નિવ વાનરાન્ ।
સર્વજ્ઞો નિત્યલક્ષ્મીકો વિજ્ઞાનાત્માપિ રાઘવઃ ॥ ૧૬॥

સીતામનુશુશોચાર્ત્તઃ પ્રાકૃતઃ પ્રાકૃતામિવ ।

બુદ્ધ્યાદિસાક્ષિણસ્તસ્ય માયાકાર્યાતિવર્તિનઃ ॥ ૧૭॥

રાગાદિરહિતસ્યાસ્ય તત્કાર્યં કથમુદ્ભવેત્ ।
બ્રહ્મણોક્તમૃતં કર્તું રાજ્ઞો દશરથસ્ય હિ ॥ ૧૮॥

તપસઃ ફલદાનાય જાતો માનુષવેષધૃક્ ।
માયયા મોહિતાઃ સર્વે જના અજ્ઞાનસંયુતાઃ ॥ ૧૯॥

કથમેષાં ભવેન્મોક્ષ ઇતિ વિષ્ણુર્વિચિન્તયન્ ।
કથાં પ્રથયિતું લોકે સર્વલોકમલાપહામ્ ॥ ૨૦॥

રામાયણાભિધાં રામો ભૂત્વા માનુષચેષ્ટકઃ ।
ક્રોધં મોહં ચ કામં ચ વ્યવહારાર્થસિદ્ધયે ॥ ૨૧॥

તત્તત્કાલોચિતં ગૃહ્ણન્ મોહયત્યવશાઃ પ્રજાઃ ।
અનુરક્ત ઇવાશેષગુણેષુ ગુણવર્જિતઃ ॥ ૨૨॥

વિજ્ઞાનમૂર્તિર્વિજ્ઞાનશક્તિઃ સાક્ષ્યગુણાન્વિતઃ ।
અતઃ કામાદિભિર્નિત્યમવિલિપ્તો યથા નભઃ ॥ ૨૩॥

વિન્દન્તિ મુનયઃ કેચિજ્જાનન્તિ જનકાદયઃ ।
તદ્ભક્તા નિર્મલાત્માનઃ સમ્યગ્ જાનન્તિ નિત્યદા ।
ભક્તચિત્તાનુસારેણ જાયતે ભગવાનજઃ ॥ ૨૪॥

લક્ષ્મણોઽપિ તદા ગત્વા કિષ્કિન્ધાનગરાન્તિકમ્ ।
જ્યાઘોષમકરોત્તીવ્રં ભીષયન્ સર્વવાનરાન્ ॥ ૨૫॥

તં દૃષ્ટ્વા પ્રાકૃતાસ્તત્ર વાનરા વપ્રમૂર્ધનિ ।
ચક્રુઃ કિલકિલાશબ્દં ધૃતપાષાણપાદપાઃ ॥ ૨૬॥

તાન્ દૃષ્ટ્વા ક્રોધતામ્રાક્ષો વાનરાન્ લક્ષ્મણસ્તદા ।
નિર્મૂલાન્ કર્તુમુદ્યુક્તો ધનુરાનમ્ય વીર્યવાન્ ॥ ૨૭॥

તતઃ શીઘ્રં સમાપ્લુત્ય જ્ઞાત્વા લક્ષ્મણમાગતમ્ ॥ ૨૮॥

નિવાર્ય વાનરાન્ સર્વાનઙ્ગદો મન્ત્રિસત્તમઃ ।
ગત્વા લક્ષ્મણસામીપ્યં પ્રણનામ સ દણ્ડવત્ ॥ ૨૯॥

તતોઽઙ્ગદં પરિષ્વજ્ય લક્ષ્મણઃ પ્રિયવર્ધનઃ ।
ઉવાચ વત્સ ગચ્છ ત્વં પિતૃવ્યાય નિવેદય ॥ ૩૦॥

મામાગતં રાઘવેણ ચોદિતં રૌદ્રમૂર્તિના ।
તથેતિ ત્વરિતં ગત્વા સુગ્રીવાય ન્યવેદયત્ ॥ ૩૧॥

લક્ષ્મણઃ ક્રોધતામ્રાક્ષઃ પુરદ્વારિ બહિઃ સ્થિતઃ ।
તચ્છ્રુત્વાતીવ સન્ત્રસ્તઃ સુગ્રીવો વાનરેશ્વરઃ ॥ ૩૨॥

આહૂય મન્ત્રિણાં શ્રેષ્ઠં હનૂમન્તમથાબ્રવીત્ ।
ગચ્છ ત્વમઙ્ગદેનાશુ લક્ષ્મણં વિનયાન્વિતઃ ॥ ૩૩॥

સાન્ત્વયન્ કોપિતં વીરં શનૈરાનય સાદરમ્ ।
પ્રેષયિત્વા હનૂમન્તં તારામાહ કપીશ્વરઃ ॥ ૩૪॥

ત્વં ગચ્છ સાન્ત્વયન્તી તં લક્ષ્મણં મૃદુભાષિતૈઃ ।
શાન્તમન્તઃપુરં નીત્વા પશ્ચાદ્દર્શય મેઽનઘે ॥ ૩૫॥

ભવત્વિતિ તતસ્તારા મધ્યકક્ષં સમાવિશત્ ।
હનુમાનઙ્ગદેનૈવ સહિતો લક્ષ્મણાન્તિકમ્ ॥ ૩૬॥

ગત્વા નનામ શિરસા ભક્ત્યા સ્વાગતમબ્રવીત્ ।
એહિ વીર મહાભાગ ભવદ્ગૃહમશઙ્કિતમ્ ॥ ૩૭॥

પ્રવિશ્ય રાજદારાદીન્ દૃષ્ટ્વા સુગ્રીવમેવ ચ ।
યદાજ્ઞાપયસે પશ્ચાત્તત્સર્વં કરવાણિ ભોઃ ॥ ૩૮॥

ઇત્યુક્ત્વા લક્ષ્મણં ભક્ત્યા કરે ગૃહ્ય સ મારુતિઃ ।
આનયામાસ નગરમધ્યાદ્રાજગૃહં પ્રતિ ॥ ૩૯॥

પશ્યંસ્તત્ર મહાસૌધાન્ યૂથપાનાં સમન્તતઃ ।
જગામ ભવનં રાજ્ઞઃ સુરેન્દ્રભવનોપમમ્ ॥ ૪૦॥

મધ્યકક્ષે ગતા તત્ર તારા તારાધિપાનના ।
સર્વાભરણસમ્પન્ના મદરક્તાન્તલોચના ॥ ૪૧॥

ઉવાચ લક્ષ્મણં નત્વા સ્મિતપૂર્વાભિભાષિણી ।
એહિ દેવર ભદ્રં તે સાધુસ્ત્વં ભક્તવત્સલઃ ॥ ૪૨॥

કિમર્થં કોપમાકાર્ષીર્ભક્તે ભૃત્યે કપીશ્વરે ।
બહુકાલમનાશ્વાસં દુઃખમેવાનુભૂતવાન્ ॥ ૪૩॥

ઇદાનીં બહુદુઃખૌઘાદ્ભવદ્ભિરભિરક્ષિતઃ ।
ભવત્પ્રસાદાત્સુગ્રીવઃ પ્રાપ્તસૌખ્યો મહામતિઃ ॥ ૪૪॥

કામાસક્તો રઘુપતેઃ સેવાર્થં નાગતો હરિઃ ।
આગમિષ્યન્તિ હરયો નાનાદેશગતાઃ પ્રભો ॥ ૪૫॥

પ્રેષિતો દશસાહસ્રા હરયો રઘુસત્તમ ।
આનેતું વાનરાન્ દિગ્ભ્યો મહાપર્વતસન્નિભાન્ ॥ ૪૬॥

સુગ્રીવઃ સ્વયમાગત્ય સર્વવાનરયૂથપૈઃ ।
વધયિષ્યતિ દૈત્યૌઘાન્ રાવણં ચ હનિષ્યતિ ॥ ૪૭॥

ત્વયૈવ સહિતોઽદ્યૈવ ગન્તા વાનરપુઙ્ગવઃ ।
પશ્યાન્તર્ભવનં તત્ર પુત્રદારસુહૃદ્વૃતમ્ ॥ ૪૮॥

દૃષ્ટ્વા સુગ્રીવમભયં દત્ત્વા નય સહૈવ તે ।
તારાયા વચનં શ્રુત્વા કૃશક્રોધોઽથ લક્ષ્મણઃ ॥ ૪૯॥

જગામાન્તઃપુરં યત્ર સુગ્રીવો વાનરેશ્વરઃ ।
રુમામાલિઙ્ગ્ય સુગ્રીવઃ પર્યઙ્કે પર્યવસ્થિતઃ ॥ ૫૦॥

દૃષ્ટ્વા લક્ષ્મણમત્યર્થમુત્પપાતાતિભીતવત્ ।
તં દૃષ્ટ્વા લક્ષ્મણઃ ક્રુદ્ધો મદવિહ્વલિતેક્ષણમ્ ॥ ૫૧॥

સુગ્રીવં પ્રાહ દુર્વૃત્ત વિસ્મૃતોઽસિ રઘૂત્તમમ્ ।
વાલી યેન હતો વીરઃ સ બાણોઽદ્ય પ્રતીક્ષતે ॥ ૫૨॥

ત્વમેવ વાલિનો માર્ગં ગમિષ્યસિ મયા હતઃ ।
એવમત્યન્તપરુષં વદન્તં લક્ષ્મણં તદા ॥ ૫૩॥

ઉવાચ હનુમાન્ વીરઃ કથમેવં પ્રભાષસે ।
ત્વત્તોઽધિકતરો રામે ભક્તોઽયં વાનરાધિપઃ ॥ ૫૪॥

રામકાર્યાર્થમનિશં જાગર્તિ ન તુ વિસ્મૃતઃ ।
આગતાઃ પરિતઃ પશ્ય વાનરાઃ કોટિશઃ પ્રભો ॥ ૫૫॥

ગમિષ્યન્ત્યચિરેણૈવ સીતાયાઃ પરિમાર્ગણમ્ ।
સાધયિષ્યતિ સુગ્રીવો રામકાર્યમશેષતઃ ॥ ૫૬॥

શ્રુત્વા હનુમતો વાક્યં સૌમિત્રિર્લજ્જિતોઽભવત્ ।
સુગ્રીવોઽપ્યર્ઘ્યપાદ્યાદ્યૈર્લક્ષ્મણં સમપૂજયત્ ॥ ૫૭॥

આલિઙ્ગ્ય પ્રાહ રામસ્ય દાસોઽહં તેન રક્ષિતઃ ।

રામઃ સ્વતેજસા લોકાન્ ક્ષણાર્દ્ધેનૈવ જેષ્યતિ ॥ ૫૮॥

સહાયમાત્રમેવાહં વાનરૈઃ સહિતઃ પ્રભો ।
સૌમિત્રિરપિ સુગ્રીવં પ્રાહ કિઞ્ચિન્મયોદિતમ્ ॥ ૫૯॥

તત્ક્ષમસ્વ મહાભાગ પ્રણયાદ્ભાષિતં મયા ।
ગચ્છામોઽદ્યૈવ સુગ્રીવ રામસ્તિષ્ઠતિ કાનને ॥ ૬૦॥

એક એવાતિદુઃખાર્ત્તો જાનકીવિરહાત્પ્રભુઃ ।
તથેતિ રથમારુહ્ય લક્ષ્મણેન સમન્વિતઃ ॥ ૬૧॥

વાનરૈઃ સહિતો રાજા રામમેવાન્વપદ્યત ॥ ૬૨॥

ભેરીમૃદઙ્ગૈર્બહુઋક્ષવાનરૈઃ શ્વેતાતપત્રૈર્વ્યજનૈશ્ચ શોભિતઃ ।
નીલાઙ્ગદાદ્યૈર્હનુમત્પ્રધાનૈઃ સમાવૃતો રાઘવમભ્યગાદ્ધરિઃ ॥ ૬૩॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે કિષ્કિન્ધાકાણ્ડે
પઞ્ચમઃ સર્ગઃ ॥ ૫॥

## ॥ ષષ્ઠ સર્ગઃ ॥

દૃષ્ટ્વા રામં સમાસીનં ગુહાદ્વારિ શિલાતલે ।
ચૈલાજિનધરં શ્યામં જટામૌલિવિરાજિતમ્ ॥ ૧॥

વિશાલનયનં શાન્તં સ્મિતચારુમુખામ્બુજમ્ ।
સીતાવિરહસન્તપ્તં પશ્યન્તં મૃગપક્ષિણઃ ॥ ૨॥

રથાદ્દૂરાત્સમુત્પત્ય વેગાત્સુગ્રીવલક્ષ્મણૌ ।
રામસ્ય પાદયોરગ્રે પેતતુર્ભક્તિસંયુતૌ ॥ ૩॥

રામઃ સુગ્રીવમાલિઙ્ગ્ય પૃષ્ટ્વાનામયમન્તિકે ।
સ્થાપયિત્વા યથાન્યાયં પૂજયામાસ ધર્મવિત્ ॥ ૪॥

તતોઽબ્રવીદ્રઘુશ્રેષ્ઠં સુગ્રીવો ભક્તિનમ્રધીઃ ।
દેવ પશ્ય સમાયાન્તીં વાનરાણાં મહાચમૂમ્ ॥ ૫॥

કુલાચલાદ્રિસમ્ભૂતા મેરુમન્દરસન્નિભાઃ ।
નાનાદ્વીપસરિચ્છૈલવાસિનઃ પર્વતોપમાઃ ॥ ૬॥

અસઙ્ખ્યાતાઃ સમાયાન્તિ હરયઃ કામરૂપિણઃ ।
સર્વે દેવાંશસમ્ભૂતાઃ સર્વે યુદ્ધવિશારદાઃ ॥ ૭॥

અત્ર કેચિદ્ગજબલાઃ કેચિદ્દશગજોપમાઃ ।
ગજાયુતબલાઃ કેચિદન્યેઽમિતબલાઃ પ્રભો ॥ ૮॥

કેચિદઞ્જનકૂટાભાઃ કેચિત્કનકસન્નિભાઃ ।
કેચિદ્રક્તાન્તવદના દીર્ઘવાલાસ્તથાપરે ॥ ૯॥

શુદ્ધસ્ફટિકસઙ્કાશાઃ કેચિદ્રાક્ષસસન્નિભાઃ ।
ગર્જન્તઃ પરિતો યાન્તિ વાનરા યુદ્ધકાઙ્ક્ષિણઃ ॥ ૧૦॥

ત્વદાજ્ઞાકારિણઃ સર્વે ફલમૂલાશનાઃ પ્રભો ।
ઋક્ષાણામધિપો વીરો જામ્બવાન્નામ બુદ્ધિમાન્ ॥ ૧૧॥

એષ મે મન્ત્રિણાં શ્રેષ્ઠઃ કોટિભલ્લૂકવૃન્દપઃ ।
હનૂમાનેષ વિખ્યાતો મહાસત્ત્વપરાક્રમઃ ॥ ૧૨॥

વાયુપુત્રોઽતિતેજસ્વી મન્ત્રી બુદ્ધિમતાં વરઃ ।
નલો નીલશ્ચ ગવયો ગવાક્ષો ગન્ધમાદનઃ ॥ ૧૩॥

શરભો મૈન્દવશ્ચૈવ ગજઃ પનસ એવ ચ ।
વલીમુખો દધિમુખઃ સુષેણસ્તાર એવ ચ ॥ ૧૪॥

કેસરી ચ મહાસત્ત્વઃ પિતા હનુમતો બલી ।
એતે તે યૂથપા રામ પ્રાધાન્યેન મયોદિતાઃ ॥ ૧૫॥

મહાત્માનો મહાવીર્યાઃ શક્રતુલ્યપરાક્રમાઃ ।
એતે પ્રત્યેકતઃ કોટિકોટિવાનરયૂથપાઃ ॥ ૧૬॥

તવાજ્ઞાકારિણઃ સર્વે સર્વે દેવાંશસમ્ભવાઃ ।
એષ વાલિસુતઃ શ્રીમાનઙ્ગદો નામ વિશ્રુતઃ ॥ ૧૭॥

વાલિતુલ્યબલો વીરો રાક્ષસાનાં બલાન્તકઃ ।
એતે ચાન્યે ચ બહવસ્ત્વદર્થે ત્યક્તજીવિતાઃ ॥ ૧૮॥

યોદ્ધારઃ પર્વતાગ્રૈશ્ચ નિપુણાઃ શત્રુઘાતને ।
આજ્ઞાપય રઘુશ્રેષ્ઠ સર્વે તે વશવર્તિનઃ ॥ ૧૯॥

રામઃ સુગ્રીવમાલિઙ્ગ્ય હર્ષપૂર્ણાશ્રુલોચનઃ ।
પ્રાહ સુગ્રીવ જાનાસિ સર્વં ત્વં કાર્યગૌરવમ્ ॥ ૨૦॥

માર્ગણાર્થં હિ જાનક્યા નિયુઙ્ક્ષ્વ યદિ રોચતે ।
શ્રુત્વા રામસ્ય વચનં સુગ્રીવઃ પ્રીતમાનસઃ ॥ ૨૧॥

પ્રેષયામાસ બલિનો વાનરાન્ વાનરર્ષભઃ ।
દિક્ષુ સર્વાસુ વિવિધાન્ વાનરાન્ પ્રેષ્ય સત્વરમ્ ॥ ૨૨॥

દક્ષિણાં દિશમત્યર્થં પ્રયત્નેન મહાબલાન્ ।
યુવરાજં જામ્બવન્તં હનૂમન્તં મહાબલમ્ ॥ ૨૩॥

નલં સુષેણં શરભં મૈન્દં દ્વિવિદમેવ ચ ।
પ્રેષયામાસ સુગ્રીવો વચનં ચેદમબ્રવીત્ ॥ ૨૪॥

વિચિન્વન્તુ પ્રયત્નેન ભવન્તો જાનકીં શુભામ્ ।
માસાદર્વાઙ્નિવર્તધ્વં મચ્છાસનપુરઃસરાઃ ॥ ૨૫॥

સીતામદૃષ્ટ્વા યદિ વો માસાદૂર્ધ્વં દિનં ભવેત્ ।
તદા પ્રાણાન્તિકં દણ્ડં મત્તઃ પ્રાપ્સ્યથ વાનરાઃ ॥ ૨૬॥

ઇતિ પ્રસ્થાપ્ય સુગ્રીવો વાનરાન્ ભીમવિક્રમાન્ ।
રામસ્ય પાર્શ્વે શ્રીરામં નત્વા ચોપવિવેશ સઃ ॥ ૨૭॥

ગચ્છન્તં મારુતિં દૃષ્ટ્વા રામો વચનમબ્રવીત્ ।
અભિજ્ઞાનાર્થમેતન્મે હ્યઙ્ગુલીયકમુત્તમમ્ ॥ ૨૮॥

મન્નામાક્ષરસંયુક્તં સીતાયૈ દીયતાં રહઃ ।
અસ્મિન્ કાર્યે પ્રમાણં હિ ત્વમેવ કપિસત્તમ ।
જાનામિ સત્ત્વં તે સર્વં ગચ્છ પન્થાઃ શુભસ્તવ ॥ ૨૯॥

એવં કપીનાં રાજ્ઞા તે વિસૃષ્ટાઃ પરિમાર્ગણે ।
સીતાયા અઙ્ગદમુખા બભ્રમુસ્તત્ર તત્ર હ ॥ ૩૦॥

ભ્રમન્તો વિન્ધ્યગહને દદૃશુઃ પર્વતોપમમ્ ।
રાક્ષસં ભીષણાકારં ભક્ષયન્તં મૃગાન્ ગજાન્ ॥ ૩૧॥

રાવણોઽયમિતિ જ્ઞાત્વા કેચિદ્વાનરપુઙ્ગવાઃ ।
જઘ્નુઃ કિલકિલાશબ્દં મુઞ્ચન્તો મુષ્ટિભિઃ ક્ષણાત્ ॥ ૩૨॥

નાયં રાવણ ઇત્યુક્ત્વા યયુરન્યન્મહદ્વનમ્ ।
તૃષાર્તા સલિલં તત્ર નાવિન્દન્ હરિપુઙ્ગવાઃ ॥ ૩૩॥

વિભ્રમન્તો મહારણ્યે શુષ્કકણ્ઠોષ્ઠતાલુકાઃ ।
દદૃશુર્ગહ્વરં તત્ર તૃણગુલ્માવૃતં મહત્ ॥ ૩૪॥

આર્દ્રપક્ષાન્ ક્રૌઞ્ચહંસાન્નિઃસૃતાન્ દદૃશુસ્તતઃ ।
અત્રાસ્તે સલિલં નૂનં પ્રવિશામો મહાગુહામ્ ॥ ૩૫॥

ઇત્યુક્ત્વા હનુમાનગ્રે પ્રવિવેશ તમન્વયુઃ ।
સર્વે પરસ્પરં ધૃત્વા બાહૂન્ બાહુભિરુત્સુકાઃ ॥ ૩૬॥

અન્ધકારે મહદ્દૂરં ગત્વાપશ્યન્ કપીશ્વરાઃ ।
જલાશયાન્ મણિનિભતોયાન્ કલ્પદ્રુમોપમાન્ ॥ ૩૭॥

વૃક્ષાન્ પક્વફલૈર્નમ્રાન્ મધુદ્રોણસમન્વિતાન્ ।
ગૃહાન્ સર્વગુણોપેતાન્ મણિવસ્ત્રાદિપૂરિતાન્ ॥ ૩૮॥

દિવ્યભક્ષ્યાન્નસહિતાન્ માનુષૈઃ પરિવર્જિતાન્ ।
વિસ્મિતાસ્તત્ર ભવને દિવ્યે કનકવિષ્ટરે ॥ ૩૯॥

પ્રભયા દીપ્યમાનાં તુ દદૃશુઃ સ્ત્રિયમેકકામ્ ।
ધ્યાયન્તીં ચીરવસનાં યોગિનીં યોગમાસ્થિતામ્ ॥ ૪૦॥

પ્રણેમુસ્તાં મહાભાગાં ભક્ત્યા ભીત્યા ચ વાનરાઃ ।
દૃષ્ટ્વા તાન્ વાનરાન્ દેવી પ્રાહ યૂયં કિમાગતાઃ ॥ ૪૧॥

કુતો વા કસ્ય દૂતા વા મત્સ્થાનં કિં પ્રધર્ષથ ।
તચ્છ્રુત્વા હનુમાનાહ શૃણુ વક્ષ્યામિ દેવિ તે ॥ ૪૨॥

અયોધ્યાધિપતિઃ શ્રીમાન્ રાજા દશરથઃ પ્રભુઃ ।
તસ્ય પુત્રો મહાભાગો જ્યેષ્ઠો રામ ઇતિ શ્રુતઃ ॥ ૪૩॥

પિતુરાજ્ઞાં પુરસ્કૃત્ય સભાર્યઃ સાનુજો વનમ્ ।
ગતસ્તત્ર હૃતા ભાર્યા તસ્ય સાધ્વી દુરાત્મના ॥ ૪૪॥

રાવણેન તતો રામઃ સુગ્રીવં સાનુજો યયૌ ।
સુગ્રીવો મિત્રભાવેન રામસ્ય પ્રિયવલ્લભામ્ ॥ ૪૫॥

મૃગયધ્વમિતિ પ્રાહ તતો વયમુપાગતાઃ ।
તતો વનં વિચિન્વન્તો જાનકીં જલકાઙ્ક્ષિણઃ ॥ ૪૬॥

પ્રવિષ્ટા ગહ્વરં ઘોરં દૈવાદત્ર સમાગતાઃ ।
ત્વં વા કિમર્થમત્રાસિ કા વા ત્વં વદ નઃ શુભે ॥ ૪૭॥

યોગિની ચ તથા દૃષ્ટ્વા વાનરાન્ પ્રાહ હૃષ્ટધીઃ ।
યથેષ્ટં ફલમૂલાનિ જગ્ધ્વા પીત્વામૃતં પયઃ ॥ ૪૮॥

આગચ્છત તતો વક્ષ્યે મમ વૃત્તાન્તમાદિતઃ ।
તથેતિ ભુક્ત્વા પીત્વા ચ હૃષ્ટાસ્તે સર્વવાનરાઃ ॥ ૪૯॥

દેવ્યાઃ સમીપં ગત્વા તે બદ્ધાઞ્જલિપુટાઃ સ્થિતાઃ ।
તતઃ પ્રાહ હનૂમન્તં યોગિની દિવ્યદર્શના ॥ ૫૦॥

હેમા નામ પુરા દિવ્યરૂપિણી વિશ્વકર્મણઃ ।
પુત્રી મહેશં નૃત્યેન તોષયામાસ ભામિની ॥ ૫૧॥

તુષ્ટો મહેશઃ પ્રદદાવિદં દિવ્યપુરં મહત્ ।
અત્ર સ્થિતા સા સુદતી વર્ષાણામયુતાયુતમ્ ॥ ૫૨॥

તસ્યા અહં સખી વિષ્ણુતત્પરા મોક્ષકાઙ્ક્ષિણી ।
નામ્ના સ્વયમ્પ્રભા દિવ્યગન્ધર્વતનયા પુરા ॥ ૫૩॥

ગચ્છન્તી બ્રહ્મલોકં સા મામાહેદં તપશ્ચર ।
અત્રૈવ નિવસન્તી ત્વં સર્વપ્રાણિવિવર્જિતે ॥ ૫૪॥

ત્રેતાયુગે દાશરથિર્ભૂત્વા નારાયણોઽવ્યયઃ ।
ભૂભારહરણાર્થાય વિચરિષ્યતિ કાનને ॥ ૫૫॥

માર્ગન્તો વાનરાસ્તસ્ય ભાર્યામાયાન્તિ તે ગુહામ્ ।
પૂજયિત્વાથ તાન્ નત્વા રામં સ્તુત્વા પ્રયત્નતઃ ॥ ૫૬॥

યાતાસિ ભવનં વિષ્ણોર્યોગિગમ્યં સનાતનમ્ ।
ઇતોઽહં ગન્તુમિચ્છામિ રામં દ્રષ્ટું ત્વરાન્વિતા ॥ ૫૭॥

યૂયં પિદધ્વમક્ષીણિ ગમિષ્યથ બહિર્ગુહામ્ ।
તથૈવ ચક્રુસ્તે વેગાદ્ગતાઃ પૂર્વસ્થિતં વનમ્ ॥ ૫૮॥

સાપિ ત્યક્ત્વા ગુહાં શીઘ્રં યયૌ રાઘવસન્નિધિમ્ ।
તત્ર રામં સસુગ્રીવં લક્ષ્મણં ચ દદર્શ હ ॥ ૫૯॥

કૃત્વા પ્રદક્ષિણં રામં પ્રણમ્ય બહુશઃ સુધીઃ ।
આહ ગદ્ગદયા વાચા રોમાઞ્ચિતતનૂરુહા ॥ ૬૦॥

દાસી તવાહં રાજેન્દ્ર દર્શનાર્થમિહાગતા ।

બહુવર્ષસહસ્રાણિ તપ્તં મે દુશ્ચરં તપઃ ॥ ૬૧॥

ગુહાયાં દર્શનાર્થં તે ફલિતં મેઽદ્ય તત્તપઃ ।
અદ્ય હિ ત્વાં નમસ્યામિ માયાયાઃ પરતઃ સ્થિતમ્ ॥ ૬૨॥

સર્વભૂતેષુ ચાલક્ષ્યં બહિરન્તરવસ્થિતમ્ ।
યોગમાયાજવનિકાચ્છન્નો માનુષવિગ્રહઃ ॥ ૬૩॥

ન લક્ષ્યસેઽજ્ઞાનદૃશાં શૈલૂષ ઇવ રૂપધૃક્ ।
મહાભાગવતાનાં ત્વં ભક્તિયોગવિધિત્સયા ॥ ૬૪॥

અવતીર્ણોઽસિ ભગવન્ કથં જાનામિ તામસી ।
લોકે જાનાતુ યઃ કશ્ચિત્તવ તત્ત્વં રઘૂત્તમ ॥ ૬૫॥

મમૈતદેવ રૂપં તે સદા ભાતુ હૃદાલયે ।
રામ તે પાદયુગલં દર્શિતં મોક્ષદર્શનમ્ ॥ ૬૬॥

અદર્શનં ભવાર્ણાનાં સન્માર્ગપરિદર્શનમ્ ।
ધનપુત્રકલત્રાદિવિભૂતિપરિદર્પિતઃ ।
અકિઞ્ચનધનં ત્વાદ્ય નાભિધાતું જનોઽર્હતિ ॥ ૬૭॥

નિવૃત્તગુણમાર્ગાય નિષ્કિઞ્ચનધનાય તે ॥ ૬૮॥

નમઃ સ્વાત્માભિરામાય નિર્ગુણાય ગુણાત્મને ।
કાલરૂપિણમીશાનમાદિમધ્યાન્તવર્જિતમ્ ॥ ૬૯॥

સમં ચરન્તં સર્વત્ર મન્યે ત્વાં પુરુષં પરમ્ ।
દેવ તે ચેષ્ટિતં કશ્ચિન્ન વેદ નૃવિડમ્બનમ્ ॥ ૭૦॥

ન તેઽસ્તિ કશ્ચિદ્દયિતો દ્વેષ્યો વાઽપર એવ ચ ।
ત્વન્માયાપિહિતાત્માનસ્ત્વાં પશ્યન્તિ તથાવિધમ્ ॥ ૭૧॥

અજસ્યાકર્તુરીશસ્ય દેવતિર્યઙ્નરાદિષુ ।
જન્મકર્માદિકં યદ્યત્તદત્યન્તવિડમ્બનમ્ ॥ ૭૨॥

ત્વામાહુરક્ષરં જાતં કથાશ્રવણસિદ્ધયે ।
કેચિત્કોસલરાજસ્ય તપસઃ ફલસિદ્ધયે ॥ ૭૩॥

કૌસલ્યયા પ્રાર્થ્યમાનં જાતમાહુઃ પરે જનાઃ ।
દુષ્ટરાક્ષસભૂભારહરણાયાર્થિતો વિભુઃ ॥ ૭૪॥

બ્રહ્મણા નરરૂપેણ જાતોઽયમિતિ કેચન ।
શૃણ્વન્તિ ગાયન્તિ ચ યે કથાસ્તે રઘુનન્દન ॥ ૭૫॥

પશ્યન્તિ તવ પાદાબ્જં ભવાર્ણવસુતારણમ્ ।
ત્વન્માયાગુણબદ્ધાહં વ્યતિરિક્તં ગુણાશ્રયમ્ ॥ ૭૬॥

કથં ત્વાં દેવ જાનીયાં સ્તોતું વાવિષયં વિભુમ્ ।
નમસ્યામિ રઘુશ્રેષ્ઠં બાણાસનશરાન્વિતમ્ ।
લક્ષ્મણેન સહ ભ્રાત્રા સુગ્રીવાદિભિરન્વિતમ્ ॥ ૭૭॥

એવં સ્તુતો રઘુશ્રેષ્ઠઃ પ્રસન્નઃ પ્રણતાઘહૃત્ ।
ઉવાચ યોગિનીં ભક્તાં કિં તે મનસિ કાઙ્ક્ષિતમ્ ॥ ૭૮॥

સા પ્રાહ રાઘવં ભક્ત્યા ભક્તિં તે ભક્તવત્સલ ।
યત્ર કુત્રાપિ જાતાયા નિશ્ચલાં દેહિ મે પ્રભો ॥ ૭૯॥

ત્વદ્ભક્તેષુ સદા સઙ્ગો ભૂયાન્મે પ્રાકૃતેષુ ન ।
જિહ્વા મે રામરામેતિ ભક્ત્યા વદતુ સર્વદા ॥ ૮૦॥

માનસં શ્યામલં રૂપં સીતાલક્ષ્મણસંયુતમ્ ।
ધનુર્બાણધરં પીતવાસસં મુકુટોજ્જ્વલમ્ ॥ ૮૧॥

અઙ્ગદૈર્નૂપુરૈર્મુક્તાહારૈઃ કૌસ્તુભકુણ્ડલૈઃ ।
ભાન્તં સ્મરતુ મે રામ વરં નાન્યં વૃણે પ્રભો ॥ ૮૨॥

શ્રીરામ ઉવાચ ।
ભવત્વેવં મહાભાગે ગચ્છ ત્વં બદરીવનમ્ ।
તત્રૈવ માં સ્મરન્તી ત્વં ત્યક્ત્વેદં ભૂતપઞ્ચકમ્ ।
મામેવ પરમાત્માનમચિરાત્પ્રતિપદ્યસે ॥ ૮૩॥

શ્રુત્વા રઘૂત્તમવચોઽમૃતસારકલ્પં
ગત્વા તદૈવ બદરીતરુખણ્ડજુષ્ટમ્ ।
તીર્થં તદા રઘુપતિં મનસા સ્મરન્તી
ત્યક્ત્વા કલેવરમવાપ પરં પદં સા ॥ ૮૪॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે કિષ્કિન્ધાકાણ્ડે
ષષ્ઠઃ સર્ગઃ ॥ ૬॥

## ॥ સપ્તમ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
અથ તત્ર સમાસીના વૃક્ષખણ્ડેષુ વાનરાઃ ।
ચિન્તયન્તો વિમુહ્યન્તઃ સીતામાર્ગણકર્શિતાઃ ॥ ૧॥

તત્રોવાચાઙ્ગદઃ કાંશ્ચિદ્વાનરાન્ વાનરર્ષભઃ ।
ભ્રમતાં ગહ્વરેઽસ્માકં માસો નૂનં ગતોઽભવત્ ॥ ૨॥

સીતા નાધિગતાસ્માભિર્ન કૃતં રાજશાસનમ્ ।
યદિ ગચ્છામ કિષ્કિન્ધાં સુગ્રીવોઽસ્માન્ હનિષ્યતિ ॥ ૩॥

વિશેષતઃ શત્રુસુતં માં મિષાન્નિહનિષ્યતિ ।
મયિ તસ્ય કુતઃ પ્રીતિરહં રામેણ રક્ષિતઃ ॥ ૪॥

ઇદાનીં રામકાર્યં મે ન કૃતં તન્મિષં ભવેત્ ।
તસ્ય મદ્ધનને નૂનં સુગ્રીવસ્ય દુરાત્મનઃ ॥ ૫॥

માતૃકલ્પાં ભ્રાતૃભાર્યાં પાપાત્માનુભવત્યસૌ ।
ન ગચ્છેયમતઃ પાર્શ્વં તસ્ય વાનરપુઙ્ગવાઃ ॥ ૬॥

ત્યક્ષ્યામિ જીવિતં ચાત્ર યેન કેનાપિ મૃત્યુના ।
ઇત્યશ્રુનયનં કેચિદ્દૃષ્ટ્વા વાનરપુઙ્ગવાઃ ॥ ૭॥

વ્યથિતાઃ સાશ્રુનયના યુવરાજમથાબ્રુવન્ ॥ ૮॥

કિમર્થં તવ શોકોઽત્ર વયં તે પ્રાણરક્ષકાઃ ।
ભવામો નિવસામોઽત્ર ગુહાયાં ભયવર્જિતાઃ ॥ ૯॥

સર્વસૌભાગ્યસહિતં પુરં દેવપુરોપમમ્ ।
શનૈઃ પરસ્પરં વાક્યં વદતાં મારુતાત્મજઃ ॥ ૧૦॥

શ્રુત્વાઙ્ગદં સમાલિઙ્ગ્ય પ્રોવાચ નયકોવિદઃ ।
વિચાર્યતે કિમર્થં તે દુર્વિચારો ન યુજ્યતે ॥ ૧૧॥

રાજ્ઞોઽત્યન્તપ્રિયસ્ત્વં હિ તારાપુત્રોઽતિવલ્લભઃ ।
રામસ્ય લક્ષ્મણાત્પ્રીતિસ્ત્વયિ નિત્યં પ્રવર્ધતે ॥ ૧૨॥

અતો ન રાઘવાદ્ભીતિસ્તવ રાજ્ઞો વિશેષતઃ ।

અહં તવ હિતે સક્તો વત્સ નાન્યં વિચારય ॥ ૧૩॥

ગુહાવાસશ્ચ નિર્ભેદ્ય ઇત્યુક્તં વાનરૈસ્તુ યત્ ।
તદેતદ્રામબાણાનામભેદ્યં કિં જગત્ત્રયે ॥ ૧૪॥

યે ત્વાં દુર્બોધયન્ત્યેતે વાનરા વાનરર્ષભ ।
પુત્રદારાદિકં ત્યક્ત્વા કથં સ્થાસ્યન્તિ તે ત્વયા ॥ ૧૫॥

અન્યદ્ગુહ્યતમં વક્ષ્યે રહસ્યં શૃણુ મે સુત ।
રામો ન માનુષો દેવઃ સાક્ષાન્નારાયણોઽવ્યયઃ ॥ ૧૬॥

સીતા ભગવતી માયા જનસમ્મોહકારિણી ।
લક્ષ્મણો ભુવનાધારઃ સાક્ષાચ્છેષઃ ફણીશ્વરઃ ॥ ૧૭॥

બ્રહ્મણા પ્રાર્થિતાઃ સર્વે રક્ષોગણવિનાશને ।
માયામાનુષભાવેન જાતા લોકૈકરક્ષકાઃ ॥ ૧૮॥

વયં ચ પાર્ષદાઃ સર્વે વિષ્ણોર્વૈકુણ્ઠવાસિનઃ ।
મનુષ્યભાવમાપન્ને સ્વેચ્છયા પરમાત્મનિ ॥ ૧૯॥

વયં વાનરરૂપેણ જાતાસ્તસ્યૈવ માયયા ।
વયં તુ તપસા પૂર્વમારાધ્ય જગતાં પતિમ્ ॥ ૨૦॥

તેનૈવાનુગૃહીતાઃ સ્મઃ પાર્ષદત્વમુપાગતાઃ ।
ઇદાનીમપિ તસ્યૈવ સેવાં કૃત્વૈવ માયયા ॥ ૨૧॥

પુનર્વૈકુણ્ઠમાસાદ્ય સુખં સ્થાસ્યામહે વયમ્ ।
ઇત્યઙ્ગદમથાશ્વાસ્ય ગતા વિન્ધ્યં મહાચલમ્ ॥ ૨૨॥

વિચિન્વન્તોઽથ શનકૈર્જાનકીં દક્ષિણામ્બુધેઃ ।
તીરે મહેન્દ્રાખ્યગિરેઃ પવિત્રં પાદમાયયુઃ ॥ ૨૩॥

દૃષ્ટ્વા સમુદ્રં દુષ્પારમગાધં ભયવર્ધનમ્ ।
વાનરા ભયસન્ત્રસ્તાઃ કિં કુર્મ ઇતિ વાદિનઃ ॥ ૨૪॥

નિષેદુરુદધેસ્તીરે સર્વે ચિન્તાસમન્વિતાઃ ।
મન્ત્રયામાસુરન્યોન્યમઙ્ગદાદ્યા મહાબલાઃ ॥ ૨૫॥

ભ્રમતો મે વને માસો ગતોઽત્રૈવ ગુહાન્તરે ।
ન દૃષ્ટો રાવણો વાદ્ય સીતા વા જનકાત્મજા ॥ ૨૬॥

સુગ્રીવસ્તીક્ષ્ણદણ્ડોઽસ્માન્નિહન્ત્યેવ ન સંશયઃ ।
સુગ્રીવવધતોઽસ્માકં શ્રેયઃ પ્રાયોપવેશનમ્ ॥ ૨૭॥

ઇતિ નિશ્ચિત્ય તત્રૈવ દર્ભાનાસ્તીર્ય સર્વતઃ ।
ઉપાવિવેશુસ્તે સર્વે મરણે કૃતનિશ્ચયાઃ ॥ ૨૮॥

એતસ્મિન્નન્તરે તત્ર મહેન્દ્રાદ્રિગુહાન્તરાત્ ।
નિર્ગત્ય શનકૈરાગાદ્ગૃધ્રઃ પર્વતસન્નિભઃ ॥ ૨૯॥

દૃષ્ટ્વા પ્રાયોપવેશેન સ્થિતાન્ વાનરપુઙ્ગવાન્ ।
ઉવાચ શનકૈર્ગૃધ્રઃ પ્રાપ્તો ભક્ષ્યોઽદ્ય મે બહુઃ ॥ ૩૦॥

એકૈકશઃ ક્રમાત્સર્વાન્ ભક્ષયામિ દિને દિને ।
શ્રુત્વા તદ્ગૃધ્રવચનં વાનરા ભીતમાનસાઃ ॥ ૩૧॥

ભક્ષયિષ્યતિ નઃ સર્વાનસૌ ગૃધ્રો ન સંશયઃ ।
રામકાર્યં ચ નાસ્માભિઃ કૃતં કિઞ્ચિદ્ધરીશ્વરાઃ ॥ ૩૨॥

સુગ્રીવસ્યાપિ ચ હિતં ન કૃતં સ્વાત્મનામપિ ।
વૃથાનેન વધં પ્રાપ્તા ગચ્છામો યમસાદનમ્ ॥ ૩૩॥

અહો જટાયુર્ધર્માત્મા રામસ્યાર્થે મૃતઃ સુધીઃ ॥

મોક્ષં પ્રાપ દુરાવાપં યોગિનામપ્યરિન્દમઃ ॥ ૩૪॥

સમ્પાતિસ્તુ તદા વાક્યં શ્રુત્વા વાનરભાષિતમ્ ।
કે વા યૂયં મમ ભ્રાતુઃ કર્ણપીયૂષસન્નિભમ્ ॥ ૩૫॥

જટાયુરિતિ નામાદ્ય વ્યાહરન્તઃ પરસ્પરમ્ ।
ઉચ્યતાં વો ભયં મા ભૂન્મત્તઃ પ્લવગસત્તમાઃ ॥ ૩૬॥

તમુવાચાઙ્ગદઃ શ્રીમાનુત્થિતો ગૃધ્રસન્નિધૌ ।
રામો દાશરથિઃ શ્રીમાન્ લક્ષ્મણેન સમન્વિતઃ ॥ ૩૭॥

સીતયા ભાર્યયા સાર્ધં વિચચાર મહાવને ।
તસ્ય સીતા હૃતા સાધ્વી રાવણેન દુરાત્મના ॥ ૩૮॥

મૃગયાં નિર્ગતે રામે લક્ષ્મણે ચ હૃતા બલાત્ ।
રામરામેતિ ક્રોશન્તી શ્રુત્વા ગૃધ્રઃ પ્રતાપવાન્ ॥ ૩૯॥

જટાયુર્નામ પક્ષીન્દ્રો યુદ્ધં કૃત્વા સુદારુણમ્ ।

રાવણેન હતો વીરો રાઘવાર્થે મહાબલઃ ॥ ૪૦॥

રામેણ દગ્ધો રામસ્ય સાયૂજ્યમગમત્ક્ષણાત્ ।
રામઃ સુગ્રીવમાસાદ્ય સખ્યં કૃત્વાગ્નિસાક્ષિકમ્ ॥ ૪૧॥

સુગ્રીવચોદિતો હત્વા વાલિનં સુદુરાસદમ્ ।
રાજ્યં દદૌ વાનરાણાં સુગ્રીવાય મહાબલઃ ॥ ૪૨॥

સુગ્રીવઃ પ્રેષયામાસ સીતાયાઃ પરિમાર્ગણે ।
અસ્માન્ વાનરવૃન્દાન્ વૈ મહાસત્ત્વાન્ મહાબલઃ ॥ ૪૩॥

માસાદર્વાઙ્નિવર્તધ્વં નો ચેત્પ્રાણાન્ હરામિ વઃ ।
ઇત્યાજ્ઞયા ભ્રમન્તોઽસ્મિન્ વને ગહ્વરમધ્યગાઃ ॥ ૪૪॥

ગતો માસો ન જાનીમઃ સીતાં વા રાવણં ચ વા ॥

મર્તું પ્રાયોપવિષ્ટા સ્મસ્તીરે લવણવારિધેઃ ॥ ૪૫॥

યદિ જાનાસિ હે પક્ષિન્ સીતાં કથય નઃ શુભામ્ ।
અઙ્ગદસ્ય વચઃ શ્રુત્વા સમ્પાતિર્હૃષ્ટમાનસઃ ॥ ૪૬॥

ઉવાચ મત્પ્રિયો ભ્રાતા જટાયુઃ પ્લવગેશ્વરાઃ ।
બહુવર્ષસહસ્રાન્તે ભ્રાતૃવાર્તા શ્રુતા મયા ॥ ૪૭॥

વાક્સાહાય્યં કરિષ્યેઽહં ભવતાં પ્લવગેશ્વરાઃ ।
ભ્રાતુઃ સલિલદાનાય નયધ્વં માં જલાન્તિકમ્ ॥ ૪૮॥

પશ્ચાત્સર્વં શુભં વક્ષ્યે ભવતાં કાર્યસિદ્ધયે ।
તથેતિ નિન્યુસ્તે તીરં સમુદ્રસ્ય વિહઙ્ગમમ્ ॥ ૪૯॥

સોઽપિ તત્સલિલે સ્નાત્વા ભ્રાતુર્દત્ત્વા જલાઞ્જલિમ્ ।
પુનઃ સ્વસ્થાનમાસાદ્ય સ્થિતો નીતો હરીશ્વરૈઃ ।
સમ્પાતિઃ કથયામાસ વાનરાન્ પરિહર્ષયન્ ॥ ૫૦॥

લઙ્કા નામ નગર્યાસ્તે ત્રિકૂટગિરિમૂર્ધનિ ।
તત્રાશોકવને સીતા રાક્ષસીભિઃ સુરક્ષિતા ॥ ૫૧॥

સમુદ્રમધ્યે સા લઙ્કા શતયોજનદૂરતઃ ।
દૃશ્યતે મે ન સન્દેહઃ સીતા ચ પરિદૃશ્યતે ॥ ૫૨॥

ગૃધ્રત્વાદ્દૂરદૃષ્ટિર્મે નાત્ર સંશયિતું ક્ષમમ્ ।

શતયોજનવિસ્તીર્ણં સમુદ્રં યસ્તુ લઙ્ઘયેત્ ॥ ૫૩॥

સ એવ જાનકીં દૃષ્ટ્વા પુનરાયાસ્યતિ ધ્રુવમ્ ।
અહમેવ દુરાત્માનં રાવણં હન્તુમુત્સહે ।
ભ્રાતુર્હન્તારમેકાકી કિન્તુ પક્ષવિવર્જિતઃ ॥ ૫૪॥

યતધ્વમતિયત્નેન લઙ્ઘિતું સરિતાં પતિમ્ ।
તતો હન્તા રઘુશ્રેષ્ઠો રાવણં રાક્ષસાધિપમ્ ॥ ૫૫॥

ઉલ્લઙ્ઘ્ય સિન્ધું શતયોજનાયતં
      લઙ્કાં પ્રવિશ્યાથ વિદેહકન્યકામ્ ।
દૃષ્ટ્વા સમાભાષ્ય ચ વારિધિં પુન-
      સ્તર્તું સમર્થઃ કતમો વિચાર્યતામ્ ॥ ૫૬॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે કિષ્કિન્ધાકાણ્ડે
સપ્તમઃ સર્ગઃ ॥ ૭॥

## ॥ અષ્ટમ સર્ગઃ ॥

અથ તે કૌતુકાવિષ્ટાઃ સમ્પાતિં સર્વવાનરાઃ ।
પપ્રચ્છુર્ભગવન્ બ્રૂહિ સ્વમુદન્તં ત્વમાદિતઃ ॥ ૧॥

સમ્પાતિઃ કથયામાસ સ્વવૃત્તાન્તં પુરા કૃતમ્ ।
અહં પુરા જટાયુશ્ચ ભ્રાતરૌ રૂઢયૌવનૌ ॥ ૨॥

બલેન દર્પિતાવાવાં બલજિજ્ઞાસયા ખગૌ ।
સૂર્યમણ્ડલપર્યન્તં ગન્તુમુત્પતિતૌ મદાત્ ॥ ૩॥

બહુયોજનસાહસ્રં ગતૌ તત્ર પ્રતાપિતઃ ।
જટાયુસ્તં પરિત્રાતું પક્ષૈરાચ્છાદ્ય મોહતઃ ॥ ૪॥

સ્થિતોઽહં રશ્મિભિર્દગ્ધપક્ષોઽસ્મિન્ વિન્ધ્યમૂર્ધનિ ।
પતિતો દૂરપતનાન્મૂર્ચ્છિતોઽહં કપીશ્વરાઃ ॥ ૫॥

દિનત્રયાત્પુનઃ પ્રાણસહિતો દગ્ધપક્ષકઃ ।
દેશં વા ગિરિકૂટાન્ વા ન જાને ભ્રાન્તમાનસઃ ॥ ૬॥

શનૈરુન્મીલ્ય નયને દૃષ્ટ્વા તત્રાશ્રમં શુભમ્ ।

શનૈઃ શનૈરાશ્રમસ્ય સમીપં ગતવાનહમ્ ॥ ૭॥

ચન્દ્રમા નામ મુનિરાડ્ દૃષ્ટ્વા માં વિસ્મિતોઽવદત્ ।
સમ્પાતે કિમિદં તેઽદ્ય વિરૂપં કેન વા કૃતમ્ ॥ ૮॥

જાનામિ ત્વામહં પૂર્વમત્યન્તં બલવાનસિ ।
દગ્ધૌ કિમર્થં તે પક્ષૌ કથ્યતાં યદિ મન્યસે ॥ ૯॥

તતઃ સ્વચેષ્ટિતં સર્વં કથયિત્વાતિદુઃખિતઃ ।
અબ્રવં મુનિશાર્દૂલ દહ્યેઽહં દાવવહ્નિના ॥ ૧૦॥

કથં ધારયિતું શક્તો વિપક્ષો જીવિતં પ્રભો ।
ઇત્યુક્તોઽથ મુનિર્વીક્ષ્ય માં દયાર્દ્રવિલોચનઃ ॥ ૧૧॥

શૃણુ વત્સ વચો મેઽદ્ય શ્રુત્વા કુરુ યથેપ્સિતમ્ ।
દેહમૂલમિદં દુઃખં દેહઃ કર્મસમુદ્ભવઃ ॥ ૧૨॥

કર્મ પ્રવર્તતે દેહેઽહમ્બુદ્ધ્યા પુરુષસ્ય હિ ।
અહઙ્કારસ્ત્વનાદિઃ સ્યાદવિદ્યાસમ્ભવો જડઃ ॥ ૧૩॥

ચિચ્છાયયા સદા યુક્તસ્તપ્તાયઃપિણ્ડવત્ સદા ।
તેન દેહસ્ય તાદાત્મ્યાદ્દેહશ્ચેતનવાન્ ભવેત્ ॥ ૧૪॥

દેહોઽહમિતિ બુદ્ધિઃ સ્યાદાત્મનોઽહઙ્કૃતેર્બલાત્ ।
તન્મૂલ એષ સંસારઃ સુખદુઃખાદિસાધકઃ ॥ ૧૫॥

આત્મનો નિર્વિકારસ્ય મિથ્યા તાદાત્મ્યતઃ સદા ।
દેહોઽહં કર્મકર્તાહમિતિ સઙ્કલ્પ્ય સર્વદા ॥ ૧૬॥

જીવઃ કરોતિ કર્માણિ તત્ફલૈર્બદ્ધ્યતેઽવશઃ ।
ઊર્ધ્વાધો ભ્રમતે નિત્યં પાપપુણ્યાત્મકઃ સ્વયમ્ ॥ ૧૭॥

કૃતં મયાધિકં પુણ્યં યજ્ઞદાનાદિ નિશ્ચિતમ્ ।
સ્વર્ગં ગત્વા સુખં ભોક્ષ્ય ઇતિ સઙ્કલ્પવાન્ ભવેત્ ॥ ૧૮॥

તથૈવાધ્યાસતસ્તત્ર ચિરં ભુક્ત્વા સુખં મહત્ ।
ક્ષીણપુણ્યઃ પતત્યર્વાગનિચ્છન્ કર્મચોદિતઃ ॥ ૧૯॥

પતિત્વા મણ્ડલે ચેન્દોસ્તતો નીહારસંયુતઃ ।
ભૂમૌ પતિત્વા વ્રીહ્યાદૌ તત્ર સ્થિત્વા ચિરં પુનઃ ॥ ૨૦॥

ભૂત્વા ચતુર્વિધં ભોજ્યં પુરુષૈર્ભુજ્યતે તતઃ ।
રેતો ભૂત્વા પુનસ્તેન ઋતૌ સ્ત્રીયોનિસિઞ્ચિતઃ ॥ ૨૧॥

યોનિરક્તેન સંયુક્તં જરાયુપરિવેષ્ટિતમ્ ।
દિનેનૈકેન કલલં ભૂત્વા રૂઢત્વમાપ્નુયાત્ ॥ ૨૨॥

તત્પુનઃ પઞ્ચરાત્રેણ બુદ્બુદાકારતામિયાત્ ।
સપ્તરાત્રેણ તદપિ માંસપેશિત્વમાપ્નુયાત્ ॥ ૨૩॥

પક્ષમાત્રેણ સા પેશી રુધિરેણ પરિપ્લુતા ।
તસ્યા એવાઙ્કુરોત્પત્તિઃ પઞ્ચવિંશતિરાત્રિષુ ॥ ૨૪॥

ગ્રીવા શિરશ્ચ સ્કન્ધશ્ચ પૃષ્ઠવંશસ્તથોદરમ્ ।
પઞ્ચધાઙ્ગાનિ ચૈકૈકં જાયન્તે માસતઃ ક્રમાત્ ॥ ૨૫॥

પાણિપાદૌ તથા પાર્શ્વઃ કટિર્જાનુ તથૈવ ચ ।
માસદ્વયાત્ પ્રજાયન્તે ક્રમેણૈવ ન ચાન્યથા ॥ ૨૬॥

ત્રિભિર્માસૈઃ પ્રજાયન્તે અઙ્ગાનાં સન્ધયઃ ક્રમાત્ ।
સર્વાઙ્ગુલ્યઃ પ્રજાયન્તે ક્રમાન્માસચતુષ્ટયે ॥ ૨૭॥

નાસા કર્ણૌ ચ નેત્રે ચ જાયન્તે પઞ્ચમાસતઃ ।
દન્તપઙ્ક્તિર્નખા ગુહ્યં પઞ્ચમે જાયતે તથા ॥ ૨૮॥

અર્વાક્ ષણ્માસતશ્છિદ્રં કર્ણયોર્ભવતિ સ્ફુટમ્ ।
પાયુર્મેઢ્રમુપસ્થં ચ નાભિશ્ચાપિ ભવેન્નૃણામ્ ॥ ૨૯॥

સપ્તમે માસિ રોમાણિ શિરઃ કેશાસ્તથૈવ ચ ।
વિભક્તાવયવત્વં ચ સર્વં સમ્પદ્યતેઽષ્ટમે ॥ ૩૦॥

જઠરે વર્ધતે ગર્ભઃ સ્ત્રિયા એવં વિહઙ્ગમ ।
પઞ્ચમે માસિ ચૈતન્યં જીવઃ પ્રાપ્નોતિ સર્વશઃ ॥ ૩૧॥

નાભિસૂત્રાલ્પરન્ધ્રેણ માતૃભુક્તાન્નસારતઃ ।
વર્ધતે ગર્ભતઃ પિણ્ડો ન મ્રિયેત સ્વકર્મતઃ ॥ ૩૨॥

સ્મૃત્વા સર્વાણિ જન્માનિ પૂર્વકર્માણિ સર્વશઃ ।
જઠરાનલતપ્તોઽયમિદં વચનમબ્રવીત્ ॥ ૩૩॥

નાનાયોનિસહસ્રેષુ જાયમાનોઽનુભૂતવાન્ ।
પુત્રદારાદિસમ્બન્ધં કોટિશઃ પશુબાન્ધવાન્ ॥ ૩૪॥

કુટુમ્બભરણાસક્ત્યા ન્યાયાન્યાયૈર્ધનાર્જનમ્ ।
કૃતં નાકરવં વિષ્ણુચિન્તાં સ્વપ્નેઽપિ દુર્ભગઃ ॥ ૩૫॥

ઇદાનીં તત્ફલં ભુઞ્જે ગર્ભદુઃખં મહત્તરમ્ ।
અશાશ્વતે શાશ્વતવદ્દેહે તૃષ્ણાસમન્વિતઃ ॥ ૩૬॥

અકાર્યાણ્યેવ કૃતવાન્ન કૃતં હિતમાત્મનઃ ।
ઇત્યેવં બહુધા દુઃખમનુભૂય સ્વકર્મતઃ ॥ ૩૭॥

કદા નિષ્ક્રમણં મે સ્યાદ્ગર્ભાન્નિરયસન્નિભાત્ ।
ઇત ઊર્ધ્વં નિત્યમહં વિષ્ણુમેવાનુપૂજયે ॥ ૩૮॥

ઇત્યાદિ ચિન્તયન્ જીવો યોનિયન્ત્રપ્રપીડિતઃ ।
જાયમાનોઽતિદુઃખેન નરકાત્પાતકી યથા ॥ ૩૯॥

પૂતિવ્રણાન્નિપતિતઃ કૃમિરેષ ઇવાપરઃ ।
તતો બાલ્યાદિદુઃખાનિ સર્વ એવં વિભુઞ્જતે ॥ ૪૦॥

ત્વયા ચૈવાનુભૂતાનિ સર્વત્ર વિદિતાનિ ચ ।
ન વર્ણિતાનિ મે ગૃધ્ર યૌવનાદિષુ સર્વતઃ ॥ ૪૧॥

એવં દેહોઽહમિત્યસ્માદભ્યાસાન્નિરયાદિકમ્ ।
ગર્ભવાસાદિદુઃખાનિ ભવન્ત્યભિનિવેશતઃ ॥ ૪૨॥

તસ્માદ્દેહદ્વયાદન્યમાત્માનં પ્રકૃતેઃ પરમ્ ।
જ્ઞાત્વા દેહાદિમમતાં ત્યક્ત્વાત્મજ્ઞાનવાન્ ભવેત્ ॥ ૪૩॥

જાગ્રદાદિવિનિર્મુક્તં સત્યજ્ઞાનાદિલક્ષણમ્ ।
શુદ્ધં બુદ્ધં સદા શાન્તમાત્માનમવધારયેત્ ॥ ૪૪॥

ચિદાત્મનિ પરિજ્ઞાતે નષ્ટે મોહેઽજ્ઞસમ્ભવે ।
દેહઃ પતતુ વાઽરબ્ધકર્મવેગેન તિષ્ઠતુ ॥ ૪૫॥

યોગિનો ન હિ દુઃખં વા સુખં વાઽજ્ઞાનસમ્ભવમ્ ।
તસ્માદ્દેહેન સહિતો યાવત્પ્રારબ્ધસઙ્ક્ષયઃ ॥ ૪૬॥

તાવત્તિષ્ઠ સુખેન ત્વં ધૃતકઞ્ચુકસર્પવત્ ।
અન્યદ્વક્ષ્યામિ તે પક્ષિન્ શૃણુ મે પરમં હિતમ્ ॥ ૪૭॥

ત્રેતાયુગે દાશરથિર્ભૂત્વા નારાયણોઽવ્યયઃ ।

રાવણસ્ય વધાર્થાય દણ્ડકાનાગમિષ્યતિ ॥ ૪૮॥

સીતયા ભાર્યયા સાર્ધં લક્ષ્મણેન સમન્વિતઃ ।
તત્રાશ્રમે જનકજાં ભ્રાતૃભ્યાં રહિતે વને ॥ ૪૯॥

રાવણશ્ચોરવન્નીત્વા લઙ્કાયાં સ્થાપયિષ્યતિ ।
તસ્યાઃ સુગ્રીવનિર્દેશાદ્વાનરાઃ પરિમાર્ગણે ॥ ૫૦॥

આગમિષ્યન્તિ જલધેસ્તીરં તત્ર સમાગમઃ ।
ત્વયા તૈઃ કારણવશાદ્ભવિષ્યતિ ન સંશયઃ ॥ ૫૧॥

તદા સીતાસ્થિતિં તેભ્યઃ કથયસ્વ યથાર્થતઃ ।
તદૈવ તવ પક્ષૌ દ્વાવુત્પત્સ્યેતે પુનર્નવૌ ॥ ૫૨॥

સમ્પાતિરુવાચ ।
બોધયામાસ માં ચન્દ્રનામા મુનિકુલેશ્વરઃ ।
પશ્યન્તુ પક્ષૌ મે જાતૌ નૂતનાવતિકોમલૌ ॥ ૫૩॥

સ્વસ્તિ વોઽસ્તુ ગમિષ્યામિ સીતાં દ્રક્ષ્યથ નિશ્ચયમ્ ।
યત્નં કુરુધ્વં દુર્લઙ્ઘ્યસમુદ્રસ્ય વિલઙ્ઘને ॥ ૫૪॥

યન્નામસ્મૃતિમાત્રતોઽપરિમિતં સંસારવારાંનિધિં
તીર્ત્વા ગચ્છતિ દુર્જનોઽપિ પરમં વિષ્ણોઃ પદં શાશ્વતમ્ ।
તસ્યૈવ સ્થિતિકારિણસ્ત્રિજગતાં રામસ્ય ભક્તાઃ પ્રિયા
યૂયં કિં ન સમુદ્રમાત્રતરણે શક્તાઃ કથં વાનરાઃ ॥ ૫૫॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે કિષ્કિન્ધાકાણ્ડે
અષ્ટમઃ સર્ગઃ ॥ ૮॥

## ॥ નવમ સર્ગઃ ॥

શ્રીમહાદેવ ઉવાચ ।
ગતે વિહાયસા ગૃધ્રરાજે વાનરપુઙ્ગવાઃ ।
હર્ષેણ મહતાવિષ્ટાઃ સીતાદર્શલાલસાઃ ॥ ૧॥

ઊચુઃ સમુદ્રં પશ્યન્તો નક્રચક્રભયઙ્કરમ્ ।
તરઙ્ગાદિભિરુન્નદ્ધમાકાશમિવ દુર્ગ્રહમ્ ॥ ૨॥

પરસ્પરમવોચન્ વૈ કથમેનં તરામહે ।
ઉવાચ ચાઙ્ગદસ્તત્ર શૃણુધ્વં વાનરોત્તમાઃ ॥ ૩॥

ભવન્તોઽત્યન્તબલિનઃ શૂરાશ્ચ કૃતવિક્રમાઃ ।
કો વાત્ર વારિધિં તીર્ત્વા રાજકાર્યં કરિષ્યતિ ॥ ૪॥

એતેષાં વાનરાણાં સ પ્રાણદાતા ન સંશયઃ ।
તદુત્તિષ્ઠતુ મે શીઘ્રં પુરતો યો મહાબલઃ ॥ ૫॥

વાનરાણાં ચ સર્વેષાં રામસુગ્રીવયોરપિ ।
સ એવ પાલકો ભૂયાન્નાત્ર કાર્યા વિચારણા ॥ ૬॥

ઇત્યુક્તે યુવરાજેન તૂષ્ણીં વાનરસૈનિકાઃ ।
આસન્નોચુઃ કિઞ્ચિદપિ પરસ્પરવિલોકિનઃ ॥ ૭॥

અઙ્ગદ ઉવાચ ।
ઉચ્યતાં વૈ બલં સર્વૈઃ પ્રત્યેકં કાર્યસિદ્ધયે ।
કેન વા સાધ્યતે કાર્યં જાનીમસ્તદનન્તરમ્ ॥ ૮॥

અઙ્ગદસ્ય વચઃ શ્રુત્વા પ્રોચુર્વીરા બલં પૃથક્ ।
યોજનાનાં દશારભ્ય દશોત્તરગુણં જગુઃ ॥ ૯॥

શતાદર્વાગ્જામ્બવાંસ્તુ પ્રાહ મધ્યે વનૌકસામ્ ।
પુરા ત્રિવિક્રમે દેવે પાદં ભૂમાનલક્ષણમ્ ॥ ૧૦॥

ત્રિઃસપ્તકૃત્વોઽહમગાં પ્રદક્ષિણવિધાનતઃ ।
ઇદાનીં વાર્ધકગ્રસ્તો ન શક્નોમિ વિલઙ્ઘિતુમ્ ॥ ૧૧॥

અઙ્ગદોઽપ્યાહ મે ગન્તું શક્યં પારં મહોદધેઃ ।
પુનર્લઙ્ઘનસામર્થ્યં ન જાનામ્યસ્તિ વા ન વા ॥ ૧૨॥

તમાહ જામ્બવાન્ વીરસ્ત્વં રાજા નો નિયામકઃ ।
ન યુક્તં ત્વાં નિયોક્તું મે ત્વં સમર્થોઽસિ યદ્યપિ ॥ ૧૩॥

અઙ્ગદ ઉવાચ ।
એવં ચેત્પૂર્વવત્સર્વે સ્વપ્સ્યામો દર્ભવિષ્ટરે ।
કેનાપિ ન કૃતં કાર્યં જીવિતું ચ ન શક્યતે ॥ ૧૪॥

તમાહ જામ્બવાન્ વીરો દર્શયિષ્યામિ તે સુત ।
યેનાસ્માકં કાર્યસિદ્ધિર્ભવિષ્યત્યચિરેણ ચ ॥ ૧૫॥

ઇત્યુક્ત્વા જામ્બવાન્ પ્રાહ હનૂમન્તમવસ્થિતમ્ ।
હનૂમન્ કિં રહસ્તૂષ્ણીં સ્થીયતે કાર્યગૌરવે ॥ ૧૬॥

પ્રાપ્તેઽઙ્ગેનેવ સામર્થ્યં દર્શયાદ્ય મહાબલ ।
ત્વં સાક્ષાદ્વાયુતનયો વાયુતુલ્યપરાક્રમઃ ॥ ૧૭॥

રામકાર્યાર્થમેવ ત્વં જનિતોઽસિ મહાત્મના ।
જાતમાત્રેણ તે પૂર્વં દૃષ્ટ્વોદ્યન્તં વિભાવસુમ્ ॥ ૧૮॥

પક્વં ફલં જિઘૃક્ષામીત્યુત્પ્લુતં બાલચેષ્ટયા ।
યોજનાનાં પઞ્ચશતં પતિતોઽસિ તતો ભુવિ ॥ ૧૯॥

અતસ્ત્વદ્બલમાહાત્મ્યં કો વા શક્નોતિ વર્ણિતુમ્ ।
ઉત્તિષ્ઠ કુરુ રામસ્ય કાર્યં નઃ પાહિ સુવ્રત ॥ ૨૦॥

શ્રુત્વા જામ્બવતો વાક્યં હનૂમાનતિહર્ષિતઃ ।
ચકાર નાદં સિંહસ્ય બ્રહ્માણ્ડં સ્ફોટયન્નિવ ॥ ૨૧॥

બભૂવ પર્વતાકારસ્ત્રિવિક્રમ ઇવાપરઃ ।
લઙ્ઘયિત્વા જલનિધિં કૃત્વા લઙ્કાં ચ ભસ્મસાત્ ॥ ૨૨॥

રાવણં સકુલં હત્વાઽઽનેષ્યે જનકનન્દિનીમ્ ।
યદ્વા બદ્ધ્વા ગલે રજ્જ્વા રાવણં વામપાણિના ॥ ૨૩॥

લઙ્કાં સપર્વતાં ધૃત્વા રામસ્યાગ્રે ક્ષિપામ્યહમ્ ।
યદ્વા દૃષ્ટ્વૈવ યાસ્યામિ જાનકીં શુભલક્ષણામ્ ॥ ૨૪॥

શ્રુત્વા હનુમતો વાક્યં જામ્બવાનિદમબ્રવીત્ ।
દૃષ્ટ્વૈવાગચ્છ ભદ્રં તે જીવન્તીં જાનકીં શુભામ્ ॥ ૨૫॥

પશ્ચાદ્રામેણ સહિતો દર્શયિષ્યસિ પૌરુષમ્ ।
કલ્યાણં ભવતાદ્ભદ્ર ગચ્છતસ્તે વિહાયસા ॥ ૨૬॥

ગચ્છન્તં રામકાર્યાર્થં વાયુસ્ત્વામનુગચ્છતુ ।
ઇત્યાશીર્ભિઃ સમામન્ત્ર્ય વિસૃષ્ટઃ પ્લવગાધિપૈઃ ॥ ૨૭॥

મહેન્દ્રાદ્રિશિરો ગત્વા બભૂવાદ્ભુતદર્શનઃ ॥ ૨૮॥

મહાનગેન્દ્રપ્રતિમો મહાત્મા સુવર્ણવર્ણોઽરુણચારુવક્ત્રઃ ।
મહાફણીન્દ્રાભસુદીર્ઘબાહુર્વાતાત્મજોઽદૃશ્યત સર્વભૂતૈઃ ॥ ૨૯॥

ઇતિ શ્રીમદધ્યાત્મરામાયણે ઉમામહેશ્વરસંવાદે કિષ્કિન્ધાકાણ્ડે
નવમઃ સર્ગઃ ॥ ૯॥

॥ સમાપ્તમિદં કિષ્કિન્ધાકાણ્ડમ્ ॥

Encoded and proofread by
Vishwas Bhide vishwas underscore bhide at yahoo.com
Revised by Agne Easwaran easwaranpsa at rediffmail.com and
ahimsasoldier at gmail.com

---

*adhyAtmarAmAyaNe kiShkindhAkANDam*
pdf was typeset on September 29, 2018

Please send corrections to *sanskrit@cheerful.com*